সচিত্ৰ-গীতা / সংস্কৃত ভাষা / সাঁচিপাত
১৭২৮ শক / ইং ১৮০৬ চন / শ্ৰীধৰ স্বামী
প্ৰণীত / চিত্ৰকাৰ শ্ৰীপৰমানন্দ দ্বিজ / ১ৰ
পৰা ৭৯ পাত / প্ৰথম পাতত বৰ্ত্তীনৰ ৯ খন চিত্ৰ,
২য় পাতত কৃষ্ণ-অৰ্জুন বৰ্ত্তীন চিত্ৰ ২খন /
প্ৰতিটো পাত ৩৩.৬ চে.মি x ১০.২ চে.মি, উঃ।

Chidananda Goswami
KKHL MRC Catalogue

C/

C/

শ্ৰীধৰ স্বামীৰ টীকাসহ
গীতা

Title of Mss.: Seichitra Gita
Language : Sans
No. of Folios : 79
Materials : SP ✓
Conservation : Preventive/Curative
Performed by KKHL , MCC: GU
National Mission for manuscripts,
New Delhi,
Date : 29, 10.06 39

।শ্রীকৃষ্ণায় নমঃ ॥ গ্রোষ্টাদশসাহস্রী ॥ গ্রোষ্টাদশ তিদশশঙ্খা মহাভিদ্দয়েমতা ২ বৈখৰ্যীতানদেশ স্কাতাখ্যোবেদাভ
রন্তিতি ॥ যাসামিত্রাবন্ধনসদনাদ্বৃচ্ছহুত্রীত্রিষষ্টিৰ্দ্দৰ্ণানৈঃ প্রকটকরনেঃ প্রাণসঙ্খ্যাপ্রসূত ২ তাসাংশ্লোকী প্রথমস্বন্দিতাং মেধ্য
মাৰ্দ্দ্রিসঙ্খ্যাংবাচাৰ্য্যক্রেকষণবিষদাষ্টথহীন্দ্রস্ত্রপাদে ॥ ষট্‌শতানি সবিংশানি শ্লোকাঃ প্রাহকেশবঃ ২
অর্জুনঃ সপ্তপঞ্চাশাৎ ষট্‌ষষ্টিং প্রাহ সঞ্জয়ঃ । ধৃত ... রাষ্ট্রঃ শ্লোকমেকং শ্লোকানাং নবীয়িত ১৪৪ ॥



সঙ্করাচার্য্যমতং ২ ॥ স্বামিমতং ২ ॥

শ্রীকৃষ্ণনারায়ণায় ॥ ০ ॥ শেষাশেষমুখব্যাখ্যাচাতুর্য্যন্ত্বেকবক্ত্রতঃ । দধানমদ্ভুতং বন্দে পরমানন্দমাধবং ॥ শ্রীমাধবং প্রণম্যোমাধবং বিশ্বেশমাদরাৎ । তদ্ভক্তিযন্ত্রিতঃ কুর্ব্বে গীতাব্যাখ্যাং সুবোধিনীং ॥ ভাষ্যকারমতং সম্যক্ তদ্ব্যাখ্যাতৃগিরস্তথা । যথামতি সমালোক্য গীতাব্যাখ্যাং সমারভে ॥ গীতাব্যাখ্যায়তে যস্যাঃ পাঠমাত্রপ্রযত্নতঃ । সেয়ং সুবোধিনী টীকা সদা ধ্যেয়া মনীষিভিঃ ॥ ইহ খলু সকললোকহিতাবতারঃ পরমকারুণিকো ভগবান্ দেবকীনন্দনঃ তত্ত্বাজ্ঞানবিজৃম্ভিতশোকমোহবিভ্রংশিতবিবেকতয়া নিজধর্ম্মত্যাগপরধর্ম্মাভিসন্ধিমন্তং ধর্ম্মজ্ঞানরহস্যোপদেশপ্লবেন শোকমোহসাগরাদুদধারৎ । তমেব ভগবদুপদিষ্টমর্থং কৃষ্ণদ্বৈপায়নঃ সপ্তভিঃ

শ্রীকৃষ্ণায় নমঃ ॥ ধৃতরাষ্ট্র উবাচ ॥ ধর্ম্মক্ষেত্রে কুরুক্ষেত্রে সমবেতা যুযুৎসবঃ । মামকাঃ পাণ্ডবাশ্চৈব কিমকুর্ব্বত সঞ্জয় ॥ ১ ॥

শ্রীঃ সঞ্জয় উবাচ ॥ দৃষ্ট্বা তু পাণ্ডবানীকং ব্যূঢ়ং দুর্য্যোধনস্তদা । আচার্য্যমুপসঙ্গম্য রাজা বচনমব্রবীৎ ॥ ২ ॥

শ্লোকশতৈরুপনিবদ্ধ । অত্রচাধ্যায়েশঃ... কাণ্ডত্রয়াত্মকং শাস্ত্রম্ ॥ যথোক্তং গীতামাহাত্ম্যে । গীতা সুগীতা কর্ত্তব্যা কিমন্যৈঃ শাস্ত্রবিস্তরৈঃ । যা স্বয়ং পদ্মনাভস্য মুখপদ্মাদ্বিনিঃসৃতা ॥ ॥ অত্র ধর্ম্মক্ষেত্র ইত্যাদি বিংশতিশ্লোকমব্রবীদিত্যন্তেন গ্রন্থেন কৃষ্ণার্জুনসংবাদপ্রস্তাবকথানিরূপ্যতে । ততঃ পরমাসমাপ্তেস্তয়োঃ সংবাদমাহ ॥ ধৃতরাষ্ট্র উবাচ ॥ ধর্ম্মক্ষেত্র ইতি । ভোঃ সঞ্জয় ধর্ম্মস্য ক্ষেত্রে কুরুক্ষেত্রে সংগতাঃ পাণ্ডবাশ্চ যুযুৎসবঃ যোদ্ধুমিচ্ছবঃ মিলিতাঃ সন্তঃ কিমকুর্ব্বত ॥ অত্র ধর্ম্মক্ষেত্র... হস্তিনাপুরস্থিতঃ স্বসারথিং সমীপস্থং সঞ্জয়ং পৃচ্ছতি... সঞ্জয়োঽপি ব্যাসপ্রসাদাল্লব্ধদিব্যচক্ষুঃ ... সাক্ষাৎ পশ্যন্নিব নিবেদয়ন্ সঞ্জয় আহ

ওঁ নমো ভগবতে বাসুদেবায় নমঃ ॥ অথাষ্টাদশভাস্তসাষহস্তং শ্রীকৃষ্ণপর্যচিকার্ষুর্ভগবদংশাবতারস্তুবদেব্যাসস্তৎপ্রতিপাদ্য ভক্তবৎসলভগবতঃ স্বহৃদি সন্নিবিষ্টং প্রার্থয়তে : কহকমানন্ত : সশৌরিঃ
মমহৃদি সন্নিধিমাতনোতু সন্নিহিতো ভবতু ইত্যাশয়ঃ : কীদৃশঃ কৃষ্ণস্য কমলং তেন ব্রজাদিস্থিতং নিত্যস্য বেদান্তেকারণ্যেঃ : স্বপয়াসাহস্ফকর্ম্মণিবর্ত্তমানজীবেষ্বাগায়নিদর্শিতা : আত্মোপাসনমিত্যাত্মদায়ন
প্রনষ্ট : কিম্ভূতঃ পরিকল্পিত ইত্যাদি : উন্নতামন্তাবর্হিনিামগ্রহাঃ : যেষাং বর্হাঃ পিচ্ছা যোমানি পরিসর্বতোভাবেন কল্পিতামানারম্ভসম্প্রেক্ষিতাউন্নতবর্হিবর্হাচ্ছায়াং যস্য যেন বা সঃ : উত্তেষেত্যাদি উত্তাহ
নমস্যৈন কম্বেনস্বহীতং বৈ তেষাং প্রতাদশয়েন : যেস্বরূপং তৎপ্রমিতিবাস ॥ ২ ॥ জাদানীন্তনের পার্শ্বস্থ মাভস্বণাৎ জঃ প্রসুজায়েন নিরূপয়তি : আতাপ্রেতি : তদ্ধস্যজয়স্থমাভস্বনং সহঃ স্তেজঃ

শ্রী ১ শ্রীজিহ্বারনসঃ ॥ কৃষ্ণকমলনিদর্শিতামন্তদঃ পরিকল্পিতাঙ্কবর্হি বর্হস্তু ডঃ ৷ উত্তস্বকম্বস্বহীতাস্বেতাতাম মম হৃদি সন্নিধিমাতনোতু শৌরিঃ ॥ ১ ॥
আতাম্রপাণিকমলপ্রণয়িপ্রতোদমালোলহারমণিকুণ্ডলহেমসূত্রং ৷ আবি ঃশ্রমাম্বুকণমস্মদনীলমস্ত্যাদাদ্যংধনস্তুজয়স্থমাভস্বণং মহোনঃ ॥ ২ ॥
প্রস্তুতং নোহস্মানব্যাজেক্ষত : কিম্ভূতং আতাম্রেত্যাদি : আতাম্রবর্ণং পাণিযেকমলং : তেনপ্রণয়িনেহপ্রণয়ত্বং স্বহিতং প্রীতিং প্রাপ্তঃ আশ্রনীস্যেতিবা : স্নেহেন স্তুতঃ প্র
তোদোয়নতঃ ৷ আলোলেত্যাদি : হারশ্চমণিময় মকরকুণ্ডলে চ : হেমসূত্রঞ্চ : আসমন্তাল্লোলানি চঞ্চলানি হারাদীনি যস্যতৎ : আবিঃ প্রকটঃ শ্রমাস্যাঙ
শ্রমজবাং সম্যক্ষোভলেন প্রাম্বেন অম্বুনাং স্বেদানাং কণা লেশা যস্যতৎ : অম্বুদবৎ সজলমেঘবৎ শ্যামং আদ্যং আদৌভবং ॥ ২ ॥


অর্জুন
শ্রীকৃষ্ণ

জদারীংস্তানাহ দোগ্ধারমিত্যাহ প্রপন্নেতি : প্রপন্নং বিকাশিতং যঃ পারিজাতং তদেব প্রত্যক্ষং তদ্রূপপ্রকাশমানায় : পুনঃ কিংভূতায় তোত্রং বেত্রমেকস্মিন্ পাণৌ যস্য তস্মৈ : জ্ঞান
রূপাং মুদ্রামিতি : অর্জুনস্য জ্ঞানোপদেশায় : অথ শ্রীকৃষ্ণ ইতি পরিচয়ায় মুদ্রা যস্য : তস্মৈ : আনন্দরূপায় ইতি বা : অর্জুনপ্রত্যয়ায় গীতারূপামৃতং দোগ্ধি প্রকটয়তীতি : তস্মৈ

মূঃ প্রপন্নপারিজাতায় তোত্রবেত্রৈকপাণয়ে । জ্ঞানমুদ্রায় কৃষ্ণায় গীতামৃতদুহে নমঃ ॥ ৬ ॥
সর্ব্বোপনিষদো গাবো দোগ্ধা গোপালনন্দনঃ । পার্থো বৎসঃ সুধীর্ভোক্তা দুগ্ধং গীতামৃতং মহৎ ॥ ৭ ॥

তস্মৈ এবংভূতায় শ্রীকৃষ্ণায় নমোঽস্ত্বিত্যর্থঃ ॥ ৬ ॥ তদেব দোহনধেনু বৎস দুগ্ধ দোগ্ধৃ ভোক্তৃভেদেন নিরূপয়তি : সর্ব্বোপনিষদ ইতি : সর্ব্বা উপনিষদো বেদস্য শিরোভাগাঃ : গা
বস্তাঃ : গোপালনন্দনো দোগ্ধা তাসাং দোহনকর্ত্তা : পার্থো বৎসস্তাসাং সুধীর্ভোক্তা সুবুদ্ধিস্তস্য ভোক্তৃত্বং তত্ত্বং সমর্থ ইত্যর্থঃ : গীতাশাস্ত্ররূপামৃতং দুগ্ধমিব : মহৎ সর্ব্বশ্রেষ্ঠং রূপকালঙ্কা
রঃ । তথাচ : উপমেয়স্যোপমানেনাভেদারূপকং বিদ্যতে ২ তদ্রূপকমভেদো য উপমানোপমেয়য়োঃ ইতি কাব্যপ্রকাশে ॥ ৭ ॥

তস্যৈব ভক্তবৎসলস্য যোগ্যম্ ম্যাহ : উদ্ভিন্নেতি : অত্র নসারস্য যঃ শ্রীকৃষ্ণস্য বদনং অধরপত্রং লৌম্যাৎ পায়াদ্ রক্ষতু : কিম্ভূতং : উদ্ভিন্নানাং উদ্গতানাং ঘর্ম্মরূপজলানাং বিন্দুভিঃ কনি
কান্তৈরুজ্জ্বলৈঃ সংশোভমানং যল্ললাটং : তস্মিল্লোলন্তশ্চলন্তঃ যে সজলমেঘতুল্যা ঘনকাঞ্চনকিমকেশাঃ : তেষাং নিতম্বাং সন্ধীৎ সন্ধ্যাকোরিধ্যততয়েষাং : তেতুষদ্ধানাং খ্রিষ্ণবেনাবায়ত্তত
কুপ্রসহায়ং ছন্দ্যা। পনায়িতায়ঃ স্বযৌবনঃ তত্মানং সর্ব্বোৎকৃষ্টত্বং তস্য ভঙ্গেন জাতং প্রাদুর্ভূতং স্মিতং হাস্যো যস্য : তৎ ॥ ৩ ॥ সম্প্রতি ভগবন্মুখনিঃসৃতত্বাৎ সর্ব্বশাস্ত্র

উদ্ভিন্নঘর্ম্মজলবিন্দুল সললাটানানন্দঘনানকনিষ্ঠ সঙ্কীর্ত্তয়দ্ভিঃ যেন ২ পায়াৎ পনায়িতস্য যৌবনমানভঙ্গজাতস্মিতসুন্দরমঙ্গলসারস্বযেন্দুঃ ॥
: ৪ ॥ পার্থায় প্রতিপাদিতাং ভগবতা নারায়ণেন স্বয়ং ব্যাসেন গ্রথিতাং পুরাণ মুনিনা মধ্যে মহাভারতং ২ অদ্বৈতামৃতবর্ষিণীং ভগবতীমষ্টাদশাধ্যায়িনীম্
॥ ৩ ॥ অম্ব ত্বামনুসন্দধামি ভগবদ্গীতে ভবদ্বেষিণীং ॥ ৬ ॥

ধ্যানমুপদিশন্ স্বয়মপি ধ্যানমাচরতি : পার্থায়েতি ভগবত্তাপ্রকাশোত্তমেন গীতে কথিতে : হ্রাসত্বসন্দধামি চিত্তয়ামীত্যর্থঃ : হেম্বে সাক্ষাৎ কিংহশীং এবং সংসারং দ্বেষ্টুং শীলং যস্যা তেতি ভগবতা না
রায়ণেন স্বয়ং নিজস্বরূপেন পার্থায় তাবোবয়িতুং প্রতিপাদিতাং কথিতাং : মহাভারতস্য মধ্যে বেদব্যাসেন গ্রথিতাং নিবদ্ধাং : কিম্ভূতেন পুরাণমুনিনা পুরাণনিরূপকেন : অদ্বৈতাদি
অদ্বৈতং জ্ঞানং তদেবামৃতং মরণনিবর্ত্তকং বর্ষিতুং শীলমস্যা তেতি তথা : অতএব ভগবতী : সর্ব্বশাস্ত্রেষু শ্রেষ্ঠাং : অষ্টাদশাধ্যায়া যাবিদ্যতে যস্যামিতি ॥ ৬ ॥

তদেব বচনমাহ পশ্যৈতামিত্যাদি নবভিঃ । হে আচার্য্য পাণ্ডুপুত্রাণাং বিততাং চমূং পশ্য । দ্রুপদপুত্রেণ ধৃষ্টদ্যুম্নেন ব্যূহরচনয়া অধিষ্ঠিতাং ॥ ৩ ॥ কিঞ্চ অত্রেতি অত্র চম্বাং ইষবো বাণা অস্যন্তে ক্ষিপ্যন্তে এভিরিতি ইষ্বাসা
ধনূংষি । মহান্তি ইষ্বাসা যেষাং তে মহেষ্বাসাঃ । তথা ভীমার্জ্জুনৌ তাবদত্র প্রসিদ্ধৌ তাভ্যাং সমাঃ শূরাঃ সন্তি তানেব নামভির্নির্দ্দিশতি । যুযুধানঃ সাত্যকিঃ ॥ ৪ ॥ কিঞ্চ ধৃষ্টকেতুরিতি
চেকিতানশ্চ নামতঃ কাশিরাজঃ । নরপুঙ্গবো নরশ্রেষ্ঠঃ শৈব্যঃ ॥ ৫ ॥ যুধামন্যুশ্চেতি । বিক্রান্তো যুধামন্যুর্নামৈকঃ সৌভদ্র অভিমন্যুঃ । দ্রৌপদেয়াঃ । দ্রৌপদ্যাং পঞ্চভ্যো যুধিষ্ঠিরাদিভ্যো
জাতাঃ । প্রতিবিন্ধ্যাদয়ঃ পঞ্চ । মহারথাদিলক্ষণং ॥ একো দশসহস্রাণি যোধয়েদ্যস্তু ধন্বিনাং । শস্ত্রশাস্ত্রপ্রবীণশ্চ মহারথ ইতি স্মৃতঃ ॥

পশ্যৈতাং পাণ্ডুপুত্রাণামাচার্য্য মহতীং চমূং । ব্যূঢ়াং দ্রুপদপুত্রেণ তব শিষ্যেণ ধীমতা ॥ ৩ ॥ অত্র শূরা মহেষ্বাসা ভীমার্জ্জুনসমা যুধি । যুযুধানো বি-
রাটশ্চ দ্রুপদশ্চ মহারথঃ ॥ ৪ ॥ ধৃষ্টকেতুশ্চেকিতানঃ কাশীরাজশ্চ বীর্য্যবান্ । পুরুজিৎ কুন্তিভোজশ্চ শৈব্যশ্চ নরপুঙ্গবঃ ॥ ৫ ॥ যুধামন্যুশ্চ
বিক্রান্ত উত্তমৌজাশ্চ বীর্য্যবান্ । সৌভদ্রো দ্রৌপদেয়াশ্চ সর্ব্ব এব মহারথাঃ ॥ ৬ ॥ অস্মাকন্তু বিশিষ্টা যে তান্নিবোধ দ্বিজোত্তম ।
নায়কা মম সৈন্যস্য সংজ্ঞার্থং তান্ ব্রবীমি তে ॥ ৭ ॥ ভবান্ ভীষ্মশ্চ কর্ণশ্চ কৃপশ্চ সমিতিঞ্জয়ঃ । অশ্বত্থামা বিকর্ণশ্চ সৌমদত্তি-
স্তথৈব চ ॥ ৮ ॥ অন্যে চ বহবঃ শূরা মদর্থে ত্যক্তজীবিতাঃ । নানাশস্ত্রপ্রহরণাঃ সর্ব্বে যুদ্ধবিশারদাঃ ॥ ৯ ॥

অমিতান্ যোধয়েদ্যস্তু সম্প্রোক্তোঽতিরথস্তু সঃ । রথী ত্বেকেন যো যোদ্ধা তন্ন্যূনোঽর্দ্ধরথঃ স্মৃতঃ ॥ নিবোধ বুধ্যস্ব । নায়কা নেতারঃ । সংজ্ঞার্থং
সম্যক্ জ্ঞাপনার্থং ইত্যর্থঃ ॥ ৭ ॥ তানেবাহ ভবানিতি দ্বাভ্যাং ॥ ভবান্ দ্রোণঃ সমিতিং সংগ্রামং জয়তীতি তথা ॥ সৌমদত্তিঃ সোমদত্তস্য পুত্রো ভূরিশ্রবাঃ
॥ ৮ ॥ অন্যে চেতি । মদর্থে মৎপ্রয়োজনার্থে জীবিতং ত্যক্তুং অধ্যবসিতা ইত্যর্থঃ । নানা অনেকানি শস্ত্রাণি প্রহরণসাধনানি যেষাং তে যুদ্ধবিশারদাঃ যুদ্ধনিপুণা ইত্যর্থঃ ॥ ৯ ॥

ততঃ কিমত আহ অপর্য্যাপ্তমিতি । তত্তথাবিধৈর্বীরৈর্যুক্তমপি ভীষ্মেণাভিতো রক্ষিতমপ্যস্মাকং বলং সৈন্যং অপর্য্যাপ্তং তৈঃ সহ যোদ্ধুমসমর্থং ভাতি । ইদমেতেষাং পাণ্ডবানাং বলং ভীমেনাভিরক্ষিতং সৎ পর্য্যাপ্তং সমর্থং
ভাতি ॥ ১০ ॥ তস্মাদ্ভবদ্ভিরেবং বর্ত্তিতব্যমিত্যাহ অয়নেষু চেতি । অয়নেষু ব্যূহপ্রবেশমার্গেষু যথাভাগমবস্থিতাঃ স্বাং স্বাং রণভূমিমপরিত্যজ্যাবস্থিতাঃ সন্তো ভীষ্মমেবাভিরক্ষন্তু যথান্যৈঃ যুধ্যমানঃ পৃষ্ঠতঃ
কৈশ্চিন্ন হন্যতে তথা রক্ষন্তু ভীষ্মবলেনৈবাস্মাকং জীবিতমিতি ভাবঃ ॥ ১১ ॥ এবং বক্তমানযুক্তং স্ববচনং শ্রুত্বা ভীষ্মঃ কিং কৃতবানিত্যাহ তস্যেতি । তস্য হর্ষং জনয়ন্ কুরুবৃদ্ধঃ পিতামহো ভীষ্মঃ উচ্চৈর্মহান্তং সিংহনাদং

অপর্য্যাপ্তং তদস্মাকং বলং ভীষ্মাভিরক্ষিতং । পর্য্যাপ্তং ত্বিদমেতেষাং বলং ভীমাভিরক্ষিতং ॥ ১০ ॥ অয়নেষু চ সর্ব্বেষু যথাভাগমবস্থিতাঃ । ভীষ্মমেবাভিরক্ষন্তু
ভবন্তঃ সর্ব্ব এব হি ॥ ১১ ॥ তস্য সঞ্জনয়ন্ হর্ষং কুরুবৃদ্ধঃ পিতামহঃ । সিংহ নাদং বিনদ্যোচ্চৈঃ শঙ্খং দধ্মৌ প্রতাপবান্ ॥ ১২ ॥ ততঃ শঙ্খাশ্চ ভের্য্যশ্চ পণবানক
শ্রী গোমুখাঃ । সহসৈবাভ্যহন্যন্ত স শব্দস্তুমুলোঽভবৎ ॥ ১৩ ॥ ততঃ শ্বেতৈর্হয়ৈ র্যুক্তে মহতি স্যন্দনে স্থিতৌ । মাধবঃ পাণ্ডবশ্চৈব দিব্যৌ শঙ্খৌ প্রদধ্ম
তুঃ ॥ ১৪ ॥ পাঞ্চজন্যং হৃষীকেশো দেবদত্তং ধনঞ্জয়ঃ । পৌণ্ড্রং দ ধ্মৌ মহাশঙ্খং ভীমকর্ম্মা বৃকোদরঃ ॥ ১৫ ॥ অনন্তবিজয়ং রাজা কুন্তীপুত্রো যু
ধিষ্ঠিরঃ । নকুলঃ সহদেবশ্চ সুঘোষমণিপুষ্পকৌ ॥ ১৬ ॥ কাশ্যশ্চ পরমেষ্বাসঃ শিখণ্ডী চ মহারথঃ । ধৃষ্টদ্যুম্নো বিরাটশ্চ সাত্যকিশ্চাপরাজিতঃ ॥ ১৭ ॥

শঙ্খং দধ্মৌ বাদিতবান্ ॥ ১২ ॥ ততঃ সেনাপতিপ্রবৃত্তিমালক্ষ্য সর্ব্বতঃ সমানকর্ম্মা সর্ব্বেষাং যুদ্ধোৎসবঃ প্রবৃত্ত ইত্যাহ তত ইতি । পণবা আনকা গোমুখাশ্চ বাদ্যবিশেষাঃ সহসা তৎক্ষণমেবাভ্যহন্যন্ত বাদিতাঃ । স চ শঙ্খাদিশব্দস্তুমু
লো মহানভূৎ ॥ ১৩ ॥ ততঃ পাণ্ডবসৈন্যেঽপি যুদ্ধোৎসবঃ প্রবৃত্ত ইত্যাহ তত ইতি পঞ্চভিঃ । স্যন্দনে রথে স্থিতৌ সন্তৌ শ্রীকৃষ্ণার্জ্জুনৌ দিব্যৌ শঙ্খৌ প্রকর্ষেণ দধ্মতুঃ বাদয়ামাসতুঃ ॥ ১৪ ॥ তদেব বিভাগেনাহ পাঞ্চজন্যমিতি । পাঞ্চজন্যাদীনি
নামানি শ্রীকৃষ্ণাদিশঙ্খানাং । ভীমং ঘোরং কর্ম্ম যস্য ॥ ১৫ ॥ অনন্তবিজয়মিত্যাদি । অনন্তবিজয়ং নাম শঙ্খং রাজা যুধিষ্ঠিরো দধ্মৌ । নকুলঃ সুঘোষং শঙ্খং দধ্মৌ । সহদেবঃ মণিপুষ্পকং নাম ॥ ১৬ ॥ কাশ্যশ্চেত্যাদি । কাশ্যঃ কাশীরাজঃ কথম্ভূতঃ

দ্রুপদ ইতি পৃথিবীপতে ধৃতরাষ্ট্র ॥ ১৮ ॥ স চ শঙ্খাদীনাং নাদস্ত্বদীয়ানাং মহাভয়ং জনয়ামাস ইত্যাহ স ঘোষ ইতি ধার্তরাষ্ট্রাণাং ত্বদীয়ানাং হৃদয়ানি ব্যদারয়ৎ বিদারিতবান্ । কিং কুর্বন্ নভশ্চ পৃথিবী
ঞ্চ তুমুলো ব্যনুনাদয়ন্ প্রতিধ্বনিভির্ব্যাপ্নুবন্ ॥ ১৯ ॥ এতস্মিন্ সময়ে শ্রীকৃষ্ণমর্জ্জুনো বিজ্ঞাপয়ামাস ইত্যাহ অথেতি চতুর্ভিঃ । অথ ব্যবস্থিতান্ যুদ্ধোদ্যোগে স্থিতান্ । কপিধ্বজোঽর্জ্জুনঃ ॥ ২০ ॥ তদেব বাক্য
মাহ সেনয়োরিত্যাদি ॥ ২১ ॥ এতস্মিন্ সময়ে ॥ নবস্থাযোদ্ধা নতুপ্রাগ্ভয়াৎ অত্রাহ কৈর্ময়েত্যাদি কৈঃ সহ ময়া যোদ্ধব্যমিত্যর্থঃ । ধার্তরাষ্ট্রস্য দুর্বুদ্ধের্দুর্যোধনস্য প্রিয়ং কর্ত্তুমিচ্ছন্তঃ যে তেঽত্র সমাগতাঃ

দ্রুপদো দ্রৌপদেয়াশ্চ সর্বশঃ পৃথিবীপতে । সৌভদ্রশ্চ মহাবাহুঃ শঙ্খান্ দধ্মুঃ পৃথক্ পৃথক্ ॥ ১৮ ॥ স ঘোষো ধার্তরাষ্ট্রাণাং হৃদয়ানি ব্যদ
ারয়ৎ ॥ নভশ্চ পৃথিবীঞ্চৈব তুমুলো ব্যনুনাদয়ন্ ॥ ১৯ ॥ অথ ব্যব স্থিতান্ দৃষ্ট্বা ধার্তরাষ্ট্রান্ কপিধ্বজঃ । প্রবৃত্তে শস্ত্রসম্পাতে ধনুরুদ্যম্য পাণ্
ডবঃ । হৃষীকেশং তদা বাক্যমিদমাহ মহীপতে ॥ ২০ ॥ অর্জ্জুন উবা চ ॥ সেনয়োরুভয়োর্মধ্যে রথং স্থাপয় মেঽচ্যুত । যাবদেতান্নিরীক্ষেঽহং যো
দ্ধুকামানবস্থিতান্ ॥ ২১ ॥ কৈর্ময়া সহ যোদ্ধব্যমস্মিন্ রণসমুদ্যমে যোৎস্যমানানবেক্ষেঽহং য এতেঽত্র সমাগতাঃ । ধার্তরাষ্ট্রস্য দুর্বুদ্ধের্যুদ্ধে প্রিয়চি
কীর্ষবঃ ॥ ২২ ॥ সঞ্জয় উবাচ ॥ এবমুক্তো হৃষীকেশো গুডাকেশেন ভারত । সেনয়োরুভয়োর্মধ্যে স্থাপয়িত্বা রথোত্তমং ॥ ২৩ ॥ ভীষ্মদ্রোণপ্রমুখ
তঃ সর্বেষাঞ্চ মহীক্ষিতাং । উবাচ পার্থ পশ্যৈতান্ সমবেতান্ কুরূনিতি ॥ ২৪ ॥ ২৪ ॥

তানহং দ্রক্ষ্যামি যাবৎ তাবৎ উভয়োঃ সেনয়োর্মধ্যে রথং স্থাপয় ইত্যন্বয়ঃ ॥ ২২ ॥ ততঃ কিং বৃত্তমিত্যপেক্ষায়াং সঞ্জয় উবাচ ॥ এবমুক্ত ইত্যাদি গুডাকা নিদ্রা তস্যা
ঈশেন । জিতনিদ্রেণার্জ্জুনেন । এবমুক্তঃ সন্ হে ভারত ধৃতরাষ্ট্র ॥ ২৩ ॥ মহীক্ষিতাং রাজ্ঞাং প্রমুখতঃ সম্মুখে চ রথং স্থাপয়িত্বা । হে পার্থ এতান্ কুরূন্ পশ্যেত্যুবাচ ॥ ২৪ ॥

ততঃ কিং বৃত্তমিত্যপেক্ষায়ামাহ । পিতৄন্ পিতৃব্যাদীনিত্যর্থঃ পুত্রান্ পৌত্রানিতি দুর্য্যোধনাদীনাং পুত্রান্ পৌত্রানিত্যর্থঃ । সখীন্ মিত্রাণি । সুহৃদঃ কৃতোপক-
রান্ তাংশ্চাপশ্যৎ ॥ ২৫ ॥ ততঃ কিং কৃতবানিত্যপেক্ষায়ামাহ তানিত্যাদি সার্দ্ধশ্লোকৈঃ ॥ ২৬ ॥ কিমব্রবীদিত্যপেক্ষায়ামাহ । দৃষ্ট্বেমমিত্যাদি
যাবদধ্যায়সমাপ্তি । ইত্থং যুযুৎসুং যোদ্ধুমিচ্ছন্তং প্রত্যুপস্থিতং সমবস্থিতং বন্ধুজনমিমং দৃষ্ট্বা । মদীয়ানি গাত্রাণি করচরণাদীনি সীদন্তি বিশীর্য্যন্তে ॥ ২৭

তত্রাপশ্যৎ স্থিতান্ পার্থঃ পিতৄনথ পিতামহান্ । আচার্য্যান্ মাতুলান্ ভ্রাতৄন্ পুত্রান্ পৌত্রান্ সখীংস্তথা । শ্বশুরান্ সুহৃদশ্চৈব সেনয়োরুভয়োরপি ॥ ২৫ ॥
তান্ সমীক্ষ্য স কৌন্তেয়ঃ সর্ব্বান্ বন্ধূনবস্থিতান্ । কৃপয়া পরয়াবিষ্টো বিষীদন্নিদমব্রবীৎ ॥ ২৬ ॥ অর্জ্জুন উবাচ ॥ দৃষ্ট্বেমং স্বজনং কৃষ্ণ যুযুৎসুং
শ্রী ৪ সমুপস্থিতং । সীদন্তি মম গাত্রাণি মুখঞ্চ পরিশুষ্যতি ॥ ২৭ ॥ বেপথুশ্চ শরীরে মে রোমহর্ষশ্চ জায়তে । গাণ্ডীবং স্রংসতে হস্তাৎ ত্বক্ চৈব
পরিদহ্যতে ॥ ২৮ ॥ নচ শক্নোম্যবস্থাতুং ভ্রমতীব চ মে মনঃ । নিমিত্তানি চ পশ্যামি বিপরীতানি কেশব ॥ ২৯ ॥ নচ শ্রেয়োঽনুপশ্যামি হত্বা
স্বজনমাহবে । নকাঙ্ক্ষে বিজয়ং কৃষ্ণ নচ রাজ্যং সুখানি চ ॥ ৩০ ॥ কিন্নো রাজ্যেন গোবিন্দ কিং ভোগৈর্জীবিতেন বা । যেষামর্থে কাঙ্ক্ষিতন্নো রাজ্যং ভোগাঃ
সুখানি চ ॥ ৩১ ॥

কিঞ্চ বেপথুঃ কম্পঃ । রোমহর্ষঃ রোমাঞ্চঃ । স্রংসতে নিপততি । পরিদহ্যতে সন্তপ্যতে ॥ ২৮ ॥ অপি চ নশক্নোমীত্যাদি বিপরীতানি নিমিত্তানি অনিষ্টসূচকানি সকলানি
নিপশ্যামি ॥ ২৯ ॥ কিঞ্চ নচেত্যাদি স্বজনং হত্বা আহবে যুদ্ধে শ্রেয়ঃ ফলং নপশ্যামি । বিজয়াদিকং কিন্নপশ্যসীতি চেত্তত্রাহ । নকাঙ্ক্ষ ইতি ॥ ৩০ ॥ এতদেব প্রপঞ্চ-
য়তি । কিন্নো রাজ্যেনেতি সার্দ্ধদ্বাভ্যাং । যদর্থমস্মাকং রাজ্যাদিকমাকাঙ্ক্ষিতং । তএতে প্রাণধনাদিত্যাগমঙ্গীকৃত্য যুদ্ধার্থমবস্থিতা অতঃ কিমস্মাকং রাজ্যাদিভিঃ কিঙ্কৃত্যং জোথ্যঃ

৩২ ॥ ননু যদি ত্বং কৃপয়া এতান্ ন হংসি তর্হি ত্বামেবৈতে রাজ্যলোভেন হনিষ্যন্ত্যেব : অতস্ত্বমেতান্ হত্বা রাজ্যং ভুঙ্ক্ষ্ব ইতি চেৎ অত আহ এতানিতি সার্দ্ধেন : ঘ্নতোঽপ্যেতান্ অস্মান্ ঘাতয়তোঽপি : ত্রৈলোক্যরাজ্যস্যাপি হেতোঃ
হন্তুমেতানপি হন্তুং নেচ্ছামি : কিম্পুনর্মহীমাত্রপ্রাপ্তয়ে ইত্যর্থঃ ॥৩৩॥ ননু চ অগ্নিদো গরদশ্চৈব শস্ত্রপাণির্ধনাপহঃ : ক্ষেত্রদারাপহারী চ ষডেতে হ্যাততায়িনঃ : ইতি স্মরণাদগ্নিদত্বাদিভিঃ ষড়্ভির্হেতুভিরেতে
আততায়িনঃ : আততায়িনাঞ্চ বধো যুক্ত এব : তথা চ আততায়িনমায়ান্তং হন্যাদেবাবিচারয়ন্ : নাততায়িবধে দোষো হন্তুর্ভবতি কশ্চন ইত্যাদিবচনাৎ অত আহ : পাপমেবেত্যাদি আততায়িনমিত্যাদিকম্

ত ইমেঽবস্থিতা যুদ্ধে প্রাণাংস্ত্যক্ত্বা ধনানি চ । আচার্য্যাঃ পিতরঃ পুত্রাস্তথৈব চ পিতামহাঃ ॥৩২॥ মাতুলাঃ শ্বশুরাঃ পৌত্রাঃ শ্যালাঃ সম্বন্ধিনস্তথা ।
এতান্ন হন্তুমিচ্ছামি ঘ্নতোঽপি মধুসূদন ॥৩৩॥ অপি ত্রৈলোক্যরাজ্যস্য হেতোঃ কিন্নু মহীকৃতে । নিহত্য ধার্ত্তরাষ্ট্রান্নঃ কা প্রীতিঃ স্যাজ্জনার্দ্দন
॥৩৪॥ পাপমেবাশ্রয়েদস্মান্ হত্বৈতানাততায়িনঃ । তস্মান্নার্হা বয়ং হন্তুং ধার্ত্তরাষ্ট্রান্ স্ববান্ধবান্ ॥৩৫॥ স্বজনং হি কথং হত্বা সুখিনঃ স্যাম মাধব
যদ্যপ্যেতে ন পশ্যন্তি লোভোপহতচেতসঃ । কুলক্ষয়কৃতং দোষং মিত্রদ্রোহে চ পাতকং ॥৩৬॥ কথং ন জ্ঞেয়মস্মাভিঃ পাপাদস্মান্নিবর্ত্তিতুং । কুলক্ষয়কৃতং দোষং প্রপশ্যদ্ভির্জ
নার্দ্দন ॥ ০ ॥ ৩৭ ॥

অর্থশাস্ত্রং তচ্চ ধর্ম্মশাস্ত্রাদ্দুর্ব্বলং : যথোক্তং যাজ্ঞবল্ক্যেন : স্মৃত্যোর্বিরোধে ন্যায়স্তু বলবান্ ব্যবহারতঃ । অর্থশাস্ত্রাত্তু বলবদ্ধর্ম্মশাস্ত্রমিতি স্থিতিরিতি । তস্মাদাততায়িনামপ্যেষামাচার্য্যাদীনাং বধেঽস্মাকং পাপমেব ভবে
ৎ অন্যায়ত্বাদধর্ম্মত্বাচ্চৈহিক : এতদ্রথস্য ॥৩৪॥ নচৈহিকং সুখং স্যাদিত্যাহ : স্বজনং হীতি ॥৩৫॥ ননু চ তেষামপি বন্ধুবধদোষে সমানে সতি : যথা এতে বন্ধুবধমঙ্গীকৃত্যাপি যুদ্ধে পাপে প্রবর্ত্তন্তে তথৈব ভবানপি
প্রবর্ত্ততাং কিমনেন বিষাদেন : অত আহ : যদ্যপীতি দ্বাভ্যাং : রাজ্যলোভেনোপহতং ভ্রষ্টবিবেকং চেতো যেষাং : অতস্তে কুলক্ষয়াদিকৃতং দোষং ন পশ্যন্তি ॥৩৬॥ তথাপ্যস্মাভির্দোষং প্রপশ্যদ্ভিস্তস্মাৎ পাপান্নিবর্ত্তিতুং কথং ন জ্ঞেয়

আদরদোষং দর্শয়তি কলৌ যুগে জাতি । সনাতনাঃ পঞ্চমহাযজ্ঞাদ্যাঃ । উক্তমর্থমুপসংহরতি কলৌ সর্ব্বে ধর্ম্মা ভিবৃত্তিং যাস্যতি ॥ ৩৮ ॥ তস্য স্বধর্ম্মাভিবৃত্তাদিত্যাদি ॥ ৩৯ ॥
এবংসতি সঙ্করস্তত্যাদি । এষাং কলযুগানাং পিতরঃ পতন্তি হি যস্মাৎ লুপ্তাঃ পিণ্ডোদকক্রিয়া যেষাং ॥ ৪০ ॥ উক্তদোষমুপসংহরতি দ্বাভ্যাং দোষৈরিত্যাদি উচ্ছিদ্যন্তে লুপ্যন্তে জাতিধর্ম্মা বর্ণ
ধর্ম্মাঃ কুলধর্ম্মাশ্চেতি চকারাদাশ্রমধর্ম্মাদয়োঽপি গৃহ্যন্তে উচ্ছন্নাঃ কুলধর্ম্মা যেষামিতি উচ্ছন্নজাতিধর্ম্মাদীনামপ্যুপলক্ষণং । অনুশুশ্রুম শ্রুতবন্তো বয়ং ॥ ৪২ ॥ প্রায়শ্চিত্তমকৃত্ব
কলৌ যুগে জাতিকুলধর্ম্মাঃ সনাতনাঃ । ধর্ম্মে নষ্টে কুলং কৃৎস্নমধর্ম্মোঽভিভবত্যুত ॥ ৩৮ ॥ অধর্ম্মাভিভবাৎ কৃষ্ণ প্রদুষ্যন্তি কুলস্ত্রিয়ঃ । স্ত্রীষু দুষ্টাসু বার্
শ্রী ১ উষ্ণেয় জায়তে বর্ণসঙ্করঃ ॥ ৩৯ ॥ সঙ্করো নরকায়ৈব কুলঘ্নানাং কুল স্যচ । পতন্তি পিতরো হ্যেষাং লুপ্তপিণ্ডোদকক্রিয়াঃ ॥ ৪০ ॥ দোষৈ
রেতৈঃ কুলঘ্নানাং বর্ণসঙ্করকারকৈঃ । উৎসাদ্যন্তে জাতিধর্ম্মাঃ কুলধ র্ম্মাশ্চ শাশ্বতাঃ ॥ ৪১ ॥ উৎসন্নকুলধর্ম্মাণাং মনুষ্যাণাং জনার্দ্দন । নর
কেনিয়তং বাসো ভবতীত্যনুশুশ্রুম ॥ ৪২ ॥ অহো বত মহৎপাপং কর্ত্তুং ব্যবসিতা বয়ং যদ্রাজ্যসুখলোভেন হন্তুং স্বজনমুদ্যতাঃ ॥ ৪৩ ॥ যদি মামপ্রতীকারমশস্ত্রং শস্ত্রপাণয়ঃ ১
নাঃ পাপেষু ভিষ্ঠানরাঃ । অপগ্রাহিণঃ পাপানি ষড়্ অগ্নিদা গরদা ইত্যাদি বচনেভ্যঃ : বন্ধুবধপরিণামেন সন্তপ্যমান আহ : অহো বতেতি : স্বজনং হন্তুমুদ্যতা ইতি : যদেতন্মহাপাপকর্ম্ম তৎ
রচিতাঃ : অধ্যবসায়ং কৃতবন্তো বয়ং : অহো বত কষ্টমিত্যর্থঃ ॥ ৪৩ ॥ এবং সন্তপ্তঃ সন্ মৃত্যুমেবাশংসমান আহ : যদি মামিত্যাদি : অপ্রতিকারং তূষ্ণীমুপবিষ্টং : যদি হনিষ্যন্তি : তত্র
ননং মমক্ষেমতরং অত্যন্তং হিতম্ভবেৎ পাপানিষ্পত্তেঃ ॥ কৃষ্ণায় নমঃ ৪৪ বৃন্দায়ৈ নমঃ ॥ ওঁ শিবায় ৪৪ নমঃ ॥ ধাঃ : ধার্ত্তরাষ্ট্রা রণে হন্যুস্তন্মে ক্ষেমতরং ভবেৎ ৪৪ ॥

ততঃ কিং বৃত্তমিত্যপেক্ষায়াং সঞ্জয় উবাচ । এবমুক্ত্বেত্যাদি । এবং সংখ্যে সংগ্রামে । রথোপস্থে রথস্যোপরি উপাবিশৎ উপবিবেশ । শোকেন সংবিগ্নং প্রকম্পিতং মানসং চিত্তং যস্য সঃ ॥ ৪৭ ॥ ইতি সুবোধন্যাং প্রথমোঽধ্যায়ঃ ॥
সৈন্যদর্শনসংক্লিষ্টহৃদয়স্যার্জ্জুনস্য চ । বিষাদো বর্ণিতোঽনেন প্রাথমাধ্যায়েন কেবলং ॥ দ্বিতীয়ে মোহজং শোকং মর্ম্মজ্ঞানোহ্যং নিরাকরণ । অঙ্কুশায়াদিশৎ সাংখ্যযোগৌ যোগেশ উক্তবান্ ॥ ততঃ কিং বৃত্তমিত্যপেক্ষা-
য়াং সঞ্জয় উবাচ । তং তথেত্যাদি । অশ্রুভিঃ পূর্ণে আকুলে ঈক্ষণে যস্য । তং তথোক্তপ্রকারেণ বিষীদন্তং অর্জ্জুনং প্রতি মধুসূদন বাক্যমুবাচ ॥ ১ ॥ তদেব বাক্যমাহ কুতস্ত্বেত্যাদি । কুতো হেতোঃ ত্বাং বিষমে সংকটে

সঞ্জয় উবাচ ॥ এবমুক্ত্বার্জ্জুনঃ সংখ্যে রথোপস্থ উপাবিশৎ । বিসৃজ্য সশরং চাপং শোকসংবিগ্নমানসঃ ॥ ৪৭ ॥ ইতি শ্রীভগবদ্গীতাসূপনিষৎসু সৈন্যদর্শনো নাম প্র-
থমোঽধ্যায়ঃ ॥ ✱ ॥ সঞ্জয় উবাচ ॥ তং তথা কৃপয়াবিষ্টমশ্রুপূর্ণাকুলেক্ষণং । বিষীদন্তমিদং বাক্যমুবাচ মধুসূদনঃ ॥ ১ ॥ শ্রীভগবানু-
বাচ ॥ কুতস্ত্বা কশ্মলমিদং বিষমে সমুপস্থিতং । অনার্য্যজুষ্টমস্বর্গ্যমকীর্ত্তিকরমর্জ্জুন ॥ ২ ॥ ক্লৈব্যং মাস্ম গমঃ পার্থ নৈতৎ
ত্বয্যুপপদ্যতে । ক্ষুদ্রং হৃদয়দৌর্ব্বল্যং ত্যক্ত্বোত্তিষ্ঠ পরন্তপ ॥ ৩ ॥ অর্জ্জুন উবাচ ॥ কথং ভীষ্মমহং সংখ্যে
দ্রোণঞ্চ মধুসূদন । ইষুভিঃ প্রতিযোৎস্যামি পূজার্হাবরিসূদন ॥ ৪ ॥ ওঁ নমঃ শিবায়

ইদং কশ্মলং সমুপস্থিতং প্রাপ্তং মোহঃ যতোঽনার্য্যৈঃ অসেবিতং । অস্বর্গ্যং অধর্ম্যং অযশস্করঞ্চ ॥ ২ ॥ ক্লৈব্যমিতি । হে পার্থ ক্লৈব্যং কাতর্য্যং মাস্ম গমঃ ন প্রাপ্নুহি । যত এতৎ ত্বয্যনুপপদ্যতে ত্বয়ি
যোগ্যং ন ভবতি । ক্ষুদ্রং তুচ্ছং হৃদয়দৌর্ব্বল্যং কাতর্য্যং ত্যক্ত্বা যুদ্ধায়োত্তিষ্ঠ । হে পরন্তপ শত্রুতাপন ॥ ৩ ॥ নাহং কাতর্য্যেণ যুদ্ধাদ্বিরতোঽস্মি । কিন্তু যুদ্ধস্যান্যায্যত্বাদিত্যর্জ্জুন উবাচ । কথমিত্যাদি । ভীষ্মদ্রোণাবিত্যাদি পূজা-
র্হৌ পূজায়াং যোগ্যৌ তৌ প্রতি কথং যোৎস্যামি । অপি তু ইষুভিঃ । বাচাপি যোদ্ধুং ন যোগ্যাবিত্যর্থঃ । অপি বাণৈঃ কথমহং যোৎস্যামীত্যর্থঃ । হে অরিসূদন শত্রুনিসূদন ॥ ৪ ॥ এতৎ স্বদেহত্যাগেন স্বাদিতিত্যাগেন ইত্যাহ

পরলোকবিরুদ্ধং গুরুবধমহত্বা ইহলোকে ভিক্ষান্নমপি ভোক্তুং শ্রেয় উচিতং : বিপর্য্যয়ে তু ন কেবলং পরত্র দুঃখং কিন্তু ইহৈব নরকদুঃখমনুভবেয়মিত্যাহ হত্বেতি গুরূন্ হত্বা তু ইহৈব রুধিরেণ প্রদিগ্ধান্ প্রকর্ষেণ লিপ্তান্ : অর্থকামাত্মকান্
ভোগান্ ভুঞ্জীয় অশ্নীয়াং । যদ্বা অর্থকামানিতি গুরূণাং বিশেষণং : অর্থলুব্ধা এতে ন তু মদ্ভ্রাতৃস্নেহান্নিবর্ত্তন্তে তস্মাদেষাং বধঃ প্রসজ্যেতেত্যর্থঃ তথাচ যুধিষ্ঠিরং প্রতি ভীষ্মেণোক্তং : অর্থস্য পুরুষো দাসো দাসস্ত্বর্থো ন কস্যচিৎ ।
ইতি সত্যং মহারাজ বদ্ধোঽস্ম্যর্থেন কৌরবৈঃ ॥ ৫ ॥ কিঞ্চ যদ্যপি অধর্ম্মমঙ্গীকৃত্য যুদ্ধং করিষ্যামস্তথাপি কিমস্মাকং জয়ঃ পরাজয়ো বা গরীয়ান্ জ্যায়স্তমাহ নচৈতদিত্যাদি দ্বাভ্যাম্ এতয়োর্মধ্যে নোঽস্মাকং কতরৎ কিং নাম গরীয়ঃ অধিকতরং বিজিতান্ তিষ্ঠ
দ্ভিঃ আদর এব দর্শয়তি : যদ্বা এতান্ বয়ং জয়েম যেষ্যামঃ : যদি বা নোঽস্মান্ এতে জয়েয়ুর্জেষ্যন্তি কিঞ্চাস্মাকং জয়োঽপি ফলতঃ পরাজয় এবেত্যাহ যানেব হত্বা জীবিতুং নেচ্ছামঃ এত এব সম্মুখে অবস্থিতাঃ ॥ ৬ ॥ তস্মাৎ এতান্ হত্বা কথং জীবিষ্যাম ইতি কৃত্বা

গুরূনহত্বা হি মহানুভাবান্ শ্রেয়ো ভোক্তুং ভৈক্ষ্যমপীহ লোকে । হত্বার্থকামাংস্তু গুরূনিহৈব ভুঞ্জীয় ভোগান্ রুধিরপ্রদিগ্ধান্ ॥ ৫ ॥ নচৈতদ্বিদ্মঃ কতরন্নো গরীয়ো
যদ্বা জয়েম যদি বা নো জয়েয়ুঃ । যানেব হত্বা ন জিজীবিষামস্তেঽবস্থিতাঃ প্রমুখে ধার্ত্তরাষ্ট্রাঃ ॥ ৬ ॥ কার্পণ্যদোষোপহতস্বভাবঃ পৃচ্ছামি ত্বাং ধর্ম্মসংমূঢ়
১৫ চেতাঃ । যচ্ছ্রেয়ঃ স্যান্নিশ্চিতং ব্রূহি তন্মে শিষ্যস্তেঽহং শাধি মাং ত্বাং প্রপন্নং ॥ ৭ ॥ নহি প্রপশ্যামি মমাপনুদ্যাদ্যচ্ছোকমুচ্ছোষণমিন্দ্রিয়াণাং । অবাপ্য ভূমা
বসপত্নমৃদ্ধং রাজ্যং সুরাণামপি চাধিপত্যং ॥ ৮ ॥ সঞ্জয় উবাচ ॥ এবমুক্ত্বা হৃষীকেশং গুড়াকেশঃ পরন্তপঃ । ন যোৎস্য ইতি গোবিন্দমুক্ত্বা তূষ্ণীং বভূব হ ॥ ৯ ॥
তমুবাচ হৃষীকেশঃ প্রহসন্নিব ভারত । সেনয়োরুভয়োর্ম্মধ্যে বিষীদন্তমিদং বচঃ ॥ ১০ ॥ শ্রীভগবানুবাচ ॥ অশোচ্যানন্বশোচস্ত্বং প্রজ্ঞাবাদাংশ্চ ভাষসে । গতাসূনগতাসূংশ্চ নানুশোচন্তি
পণ্ডিতাঃ ॥ ১১ ॥

কার্পণ্যং : দোষঃ হননমাত্মনো ন জানাতি যস্তস্মিন্ বন্ধুবধাদিরূপো দোষস্তেনোপহতঃ অভিভূতঃ স্বভাবঃ শৌর্য্যলক্ষণো যস্য সোঽহং পৃচ্ছামি তথা ধর্ম্মে সংমূঢ়ং চেতো যস্য সঃ যুদ্ধং কর্ত্তব্যং ভিক্ষাটনং বা কিং মম ধর্ম্মো বা নেতি সন্দিগ্ধচিত্তঃ সন্নিত্যর্থঃ অতো মম যচ্ছ্রেয়ঃ স্যাত্তন্নিশ্চিতং ব্রূহি : কিং
চ তেঽহং শিষ্যঃ শাসনার্হঃ অতস্ত্বাং প্রপন্নং শরণাগতং মাং শাধি শিক্ষয় ॥ ৭ ॥ ননু স্বয়মেব বিচার্য্য যুক্তং কর্ত্তব্যং কিং মমোক্তেন তত্রাহ : নহীতি ইন্দ্রিয়াণামুচ্ছোষণং অতিশোষকং মদীয়ং শোকং যৎ কর্ম্ম অপনুদ্যাৎ অপনয়েত্তদহং ন পশ্যামি : যদ্যপি ভূমৌ নিষ্ক
ণ্টকং সমৃদ্ধং রাজ্যং প্রাপ্স্যামি এবং সুরাণামপি আধিপত্যং তথাপি শোকাপনোদনোপায়ং ন পশ্যামীত্যন্বয়ঃ ॥ ৮ ॥ এবমর্জ্জুনঃ কিং কৃতবানিত্যপেক্ষায়াং সঞ্জয় উবাচ এবমিত্যাদি ॥ ৯ ॥ ততঃ কিং বৃত্তমিত্যপেক্ষায়ামাহ তমিত্যাদি প্রহসন্নিবেতি প্রসন্নমুখঃ
সন্নিত্যর্থঃ ॥ ১০ ॥ দেহাত্মনোরবিবেকাদস্যৈবং শোকো ভবতীতি তদ্বিবেকদর্শনার্থং শ্রীভগবানুবাচ অশোচ্যানিত্যাদি শোকস্যাবিষয়ীভূতানেব বন্ধূনন্বশোচিতবানসি : দৃষ্ট্বেমং স্বজনমিত্যাদিনা অহঞ্চ ত্বাং প্রজ্ঞানামিত্যাদিনা ময়া বোধিতোঽপি পুনঃ প্র
জ্ঞাবতাং পণ্ডিতানাং বাদান্ শব্দান্ কথং ভীষ্মমহং সংখ্যে ইত্যাদীন্ কেবলং ভাষসে : ন তু পণ্ডিতোঽসি : যতঃ পণ্ডিতা বিবেকিনঃ : গতাসূন্ গতপ্রাণান্ অগতাসূংশ্চ জীবতোঽপি বন্ধূন্ নানুশোচন্তি কথং জীবিষ্যন্তীতি ন শোচন্তি ॥ ১১ ॥

যান্মনঃ ১

অশোচ্যত্বে হেতুমাহ : নত্বেবাহমিতি : যথাহং পরমেশ্বরো জাতু কদাচিৎ লীলাবিগ্রহস্যাবির্ভাবতিরোভাবতোপি · নাসমিতি তু ন · অপিত্বাসমেব : অনাদিত্বাৎ : নচত্বংনাসীঃ নাপি ইমে জনাধিপা নাসন্নিতি তু ন : অপিত্বা
সন্নেব মদংশত্বাৎ : তথাতঃপরমিতঃ উপরি নভবিষ্যামঃ ন স্থাস্যাম ইতি ন অপিতু স্থাস্যাম এব জন্মমরণশূন্যত্বাৎ : অশোচ্যা ইত্যর্থঃ ॥ ১২ ॥ ননু ঈশ্বরস্য তব জন্মাদিশূন্যত্বং সত্যমেব : জীবানান্তু জন্মমরণে প্রসিদ্ধে এবেত্যাহ : দেহী
নোস্মিন্নিত্যাদি : দেহিনো দেহাভিমানিনো জীবস্য যথাস্মিন্ দেহে কৌমারাদ্যবস্থা তত্তদ্দেহনিবন্ধনা এব : নতু স্বতঃ পূর্ব্বাবস্থানাশেন : অবস্থান্তরপ্রাপ্তাবপি : স এবাহমিতি প্রত্যভিজ্ঞানাৎ : তথৈবৈতদ্দে
হনাশে দেহান্তরপ্রাপ্তিরপি : লিঙ্গদেহনিবন্ধনা : নতাবদাত্মনো নাশঃ । জাতমাত্রস্য পূর্ব্বসংস্কারেণ স্তন্যপানাদৌ প্রবৃত্তিদর্শনাৎ । অতো ধীরঃ ধীমান্ তত্র তয়োর্দেহনাশোৎপত্ত্যোর্ন মুহ্যতি :
আত্মৈব মৃতো জাতশ্চেতি ন মন্যতে ॥ ১৩ ॥ নন্বাত্মনং নশোচামি কিন্তু তদ্বিয়োগাদিদুঃখহেতুং শীতোষ্ণাদিচেত্যাহ : । মাত্রাস্পর্শা ইত্যাদি : মীয়ন্তে বিষয়া আভিরিতি মাত্রা বৃত্তি

নত্বেবাহং জাতু নাসং নত্বং নেমে জনাধিপাঃ । নচৈব নভবিষ্যামঃ সর্ব্বে বয়মতঃপরং ॥ ১২ ॥ দেহিনোস্মিন্ যথা দেহে কৌমারং যৌবনং জরা । তথা দেহা
ন্তরপ্রাপ্তির্ধীরস্তত্র নমুহ্যতি ॥ ১৩ ॥ মাত্রাস্পর্শাস্তু কৌন্তেয় শীতোষ্ণসুখদুঃখদাঃ । আগমাপায়িনোনিত্যাস্তাংস্তি
তিক্ষস্ব ভারত ॥ ১৪ ॥ যং হি নব্যথয়ন্ত্যেতে পুরুষং পুরুষর্ষভ । সমদুঃখসুখং ধীরং সোমৃতত্বায় কল্পতে ॥ ১৫ ॥
নাসতো বিদ্যতে ভাবো নাভাবো বিদ্যতে সতঃ । উভয়োরপি দৃষ্টোন্তস্ত্বনয়োস্তত্ত্বদর্শিভিঃ ॥ ১৬ ॥

য়স্তাসাং স্পর্শা বিষয়েষু সম্বন্ধাস্তে শীতোষ্ণাদিপ্রদা ভবন্তি : তেত্বাগমাপায়িত্বাদনিত্যা অস্থিরা অতস্তাংস্তিতিক্ষস্ব : যথা জলাতপাদিসংস্পর্শাস্ত এব কালভেদেন স্বভাবতঃ শীতোষ্ণাদিপ্রযচ্ছন্তি
এবমিষ্টসংযোগবিয়োগাদ্যা অপি সুখদুঃখাদিপ্রযচ্ছন্তি : তেচাস্থিরত্বাৎ সহনং তব বীরস্যোচিতং : নতু তন্নিমিত্তহর্ষবিষাদপারবশ্যমিত্যর্থঃ ॥ ১৪ ॥ তত্তিতিক্ষা সুতরাং যস্মাদপি তৎসহনমেবো
চিতং মহাফলত্বাদিত্যাহ : যং হীতি : এতে মাত্রাস্পর্শা যং পুরুষং নব্যথয়ন্তি নাভিভবন্তি সমে সুখদুঃখে যস্য তং স তৈর্বিক্ষিপ্যমাণো ধর্ম্মজ্ঞাননিষ্ঠয়ামৃতত্বায় মোক্ষায় কল্পতে যোগ্যো ভবতি ॥ ১৫ ॥ ননু আপি শী
তোষ্ণাদিকমতিদুঃসহং কথং সোঢব্যং : অতস্তৎসহনং কদাচিদাত্মনাশস্যাপি সম্ভবাদিত্যাশঙ্ক্য তত্ত্ববিচারতঃ সর্ব্বং সোঢুং শক্যমিত্যাশয়েনাহ নাসত ইত্যাদি : অসতঃ অনাত্মধর্ম্মত্বাদবিদ্যমানস্য শীতোষ্ণাদেরাত্মনি
ভাবঃ সত্তা নবিদ্যতে : তথা সতঃ সৎস্বভাবস্যাত্মনো অভাবো নাশো নবিদ্যতে : এবমনয়োঃ সদসতোরন্তঃ নির্ণয়ঃ তত্ত্বদর্শিভির্যথার্থবেদিভির্দৃষ্টঃ । এবম্ভূতবিবেকেন সহস্বেত্যর্থঃ ॥ ১৬ ॥

তত্র সৎস্বভাববস্তু অবিনাশি ইতি সামান্যেনোক্তং বিশেষতো দর্শয়তি অবিনাশীত্যাদি যেন সর্বমিদম্ আগমাপায়ধর্মকং দেহাদিকং সাক্ষিত্বেন ব্যাপ্তং তত্তু আত্মস্বরূপম্ অবিনাশি বিনাশশূন্যং বিদ্ধি জানীহি তত্র হেতু-
মাহ বিনাশমিত্যাদি ॥ ১৭ ॥ আগমাপায়ধর্মকং দর্শয়তি অন্তবন্ত ইতি নিত্যস্য সর্বদৈকরূপস্য অত এবানাশিনঃ অপ্রমেয়স্য অপরিচ্ছিন্নস্যাত্মনঃ ইমে সুখাদিধর্মকা দেহা অন্তবন্তো নশ্বরা উক্তাস্তত্ত্বদর্শিভিঃ যস্মাদেবাত্মনো ন
বিনাশঃ ন চাস্য দেহাদিসম্বন্ধঃ তস্মান্মোহজং শোকং ত্যক্ত্বা যুধ্যস্ব স্বধর্মং মা ত্যাক্ষীরিত্যর্থঃ ॥ ১৮ ॥ অতো ভীষ্মাদিমৃত্যুনিমিত্তঃ শোকো নিবারিতঃ । যচ্চাত্মনো হন্তৃত্বনিমিত্তং দুঃখমুক্তং এতান্ন হন্তুমিচ্ছামীতি
আদিনা তদপি উভয়ং নির্নিমিত্তমাহ য এনমিত্যাদি এনমাত্মানং হন্তারং হননক্রিয়ায়াঃ কর্তারং হতং হননক্রিয়ায়াঃ কর্মেত্যর্থঃ অত্র হেতুর্নায়মিতি ॥ ১৯ ॥ ন হন্যতে ইত্যেতদেব ষড্ভাববিকারশূন্যত্বেন দ্রঢ়য়তি ন জায়তে ইতি ন জায়তে
ইতি প্রতিষেধঃ ন ম্রিয়তে ইতি বিনাশপ্রতিষেধঃ বাশব্দশ্চার্থে ন চায়ং ভূত্বা উৎপদ্য ভবিতা অস্তিত্ববান্ ভবতি জন্মমরণয়োরন্তরে ভবতি । কিন্তু প্রাগেব স্বতঃ সদ্রূপ ইতি জন্মানন্তরাস্তিত্বলক্ষণদ্বিতীয়বিকারপ্রতিষেধঃ ।

অবিনাশি তু তদ্বিদ্ধি যেন সর্বমিদং ততং । বিনাশমব্যয়স্যাস্য ন কশ্চিৎকর্তুমর্হতি ॥ ১৭ ॥ অন্তবন্ত ইমে দেহা নিত্যস্যোক্তাঃ শরীরিণঃ ।
শ্রী ১৭ অনাশিনোঽপ্রমেয়স্য তস্মাদ্যুধ্যস্ব ভারত ॥ ১৮ ॥ য এনং বেত্তি হন্তারং যশ্চৈনং মন্যতে হতং । উভৌ তৌ ন বিজানীতো নায়ং হন্তি ন হন্যতে ॥ ১৯ ॥
ন জায়তে ম্রিয়তে বা কদাচিন্নায়ং ভূত্বা ভবিতা বা ন ভূয়ঃ । অজো নিত্যঃ শাশ্বতোঽয়ং পুরাণো ন হন্যতে হন্যমানে শরীরে ॥ ২০ ॥ বেদা-
বিনাশিনং নিত্যং য এনমজমব্যয়ং । কথং স পুরুষঃ পার্থ কং ঘাতয়তি হন্তি কং ॥ ২১ ॥

অত্র হেতুমাহ যস্মাদজঃ যো হি জায়তে স জন্মানন্তরমস্তিত্বং ভজতে নত্বয়ং স্বয়মস্তি সদ্রূপোপি অন্যদস্তিত্বং ভজতে ইত্যর্থঃ । নিত্যঃ সর্বদৈকরূপ ইতি বৃদ্ধিপ্রতিষেধঃ শাশ্বতঃ শশ্বদ্ভব ইত্যপক্ষয়প্রতিষেধঃ পুরাণ ইতি বি-
পরিণামপ্রতিষেধঃ পুরাপি নব এব ন তু পরিণামতো রূপান্তরং প্রাপ্য নবো ভবতীত্যর্থঃ । যদ্বা নভবিতেত্যস্যানুষঙ্গং কৃত্বা ভূয়োঽধিকং যথা স্যাত্তথা ন ভবিতেতি বৃদ্ধিপ্রতিষেধঃ অজো নিত্য ইতি চোভয়ং হেত্বভাবে হেতুর্বিপরিণামস্য
তদেবং জায়তে অস্তি বর্দ্ধতে বিপরিণমতে অপক্ষীয়তে নশ্যতীত্যেবং যাস্কাদিভিরুক্তাঃ ষড্ভাববিকারা নিরস্তাঃ যদর্থমেতে বিকারা নিরস্তাস্তং প্রস্তুতং বিনাশাভাবমুপসংহরতি ন হন্যতে হন্যমানে শরীরে ইতি ॥ ২০ ॥
অতএব হন্তা হতো বাপি প্রত্যুক্তঃ সিদ্ধমর্থমাহ বেদাবিনাশিনমিত্যাদি নিত্যং বৃদ্ধিশূন্যং অব্যয়মপক্ষয়শূন্যং অজমবিনাশঞ্চ যো বেদ স পুরুষঃ কং হন্তি কথং বা হন্তি এবং হননসাধনদ্বারাৎ তথাত্মানং প্রয়োজকো হন্তা
ন বা কং ঘাতয়তি ন কিঞ্চিদপি ন কথঞ্চিদপীত্যর্থঃ । অনেন মমাপি প্রয়োজকত্বাদি দোষং দৃষ্টিমা কার্ষীরিত্যুক্তং ॥ ২১ ॥

নরাত্মনোঽবিনাশেপি তদীয়শরীরনাশং পর্য্যালোচ্য শোচামীতি চেত্তত্রাহ বাসাংসীত্যাদিঃ কর্ম্মনিবন্ধনানাং নরানাং মরণস্যাবশ্যম্ভাবিত্বাৎ জীর্ণদেহনাশে শোকানবকাশ ইত্যর্থঃ ॥ ২২ ॥ কথং হন্তি ঘাতয়তি নেত্যুক্তং নাশসাধনাভা
বং দর্শয়ন্‌ অবিনাশিত্বমাত্মনঃ স্ফুটীকরোতি নৈনমিত্যাদি। আপো ন ক্লেদয়ন্তি মারুতশ্চ ন শোষয়তি ॥ ২৩ ॥ অত্র হেতুমাহ অচ্ছেদ্য ইত্যাদিনা সার্দ্ধেন। নিরবয়বত্বাদচ্ছেদ্যোঽয়ং অদাহ্যশ্চ অমূর্ত্তত্বাদদাহ্যঃ ভব
দ্রবাভাবাদশোষ্য ইতি ভাবঃ। অতএব অচ্ছেদ্যাদিযোগ্যো ন ভবতি যতো নিত্যঃ অবিনাশী সর্ব্বগতঃ স্থাণুঃ স্থিরস্বভাবঃ রূপান্তরাপত্তিশূন্যঃ অচলঃ পূর্ব্বরূপাপরিত্যাগী সনাতনঃ অনাদিঃ ॥ ২৪ ॥ অব্যক্ত ইত্যাদি চক্ষুরাদ্যবিষ
য়ঃ অচিন্ত্যঃ মনসোপ্যগোচরঃ অবিকার্য্যঃ কর্ম্মেন্দ্রিয়ানামপ্যগোচর ইত্যর্থঃ। উক্তমর্থং নিত্যত্বাদাবিভিয়ুক্তোঽবিক্রিয়ম [illegible] নয়তি। উপসংহরতি তস্মাদেবমিত্যাদি ॥ ২৫ ॥ তদেবমাত্মনো জন্মবিনাশাভাবান্নশো

বাসাংসি জীর্ণানি যথা বিহায় নবানি গৃহ্ণাতি নরোঽপরাণি। তথা শরীরাণি বিহায় জীর্ণান্যন্যানি সংযাতি নবানি দেহী ॥ ১২ ॥ নৈনং ছিন্দন্তি শস্ত্রাণি নৈ
নং দহতি পাবকঃ। ন চৈনং ক্লেদয়ন্ত্যাপো ন শোষয়তি মারুতঃ ॥ ২৩ ॥ অচ্ছেদ্যোঽয়মদাহ্যোঽয়মক্লেদ্যোঽশোষ্য এব চ। নিত্যঃ সর্ব্বগতঃ স্থা
ণুরচলোঽয়ং সনাতনঃ ॥ ২৪ ॥ অব্যক্তোঽয়মচিন্ত্যোঽয়মবিকার্য্যোঽয়মুচ্যতে। তস্মাদেবং বিদিত্বৈনং নানুশোচিতুমর্হসি ॥ ২৫ ॥ অথ চৈনং নিত্যজাতং নিত্যং
মন্যসে মৃতং। তথাপি ত্বং মহাবাহো নৈবং শোচিতুমর্হসি ॥ ২৬ ॥ জাতস্য হি ধ্রুবো মৃত্যুর্ধ্রুবং জন্ম মৃতস্য চ। তস্মাদপরিহার্য্যেঽর্থে ন ত্বং শোচিতুমর্হসি ॥ ২৭ ॥

কঃ কার্য্য ইত্যুক্তং তদানীং দেহেন সহাত্মনো জন্ম তদ্বিনাশেন চ বিনাশমঙ্গীকৃত্যাপি শোকো ন কার্য্য ইত্যাহ অথ চৈনমিতি। যদ্যপ্যেনমাত্মানং নিত্যং সর্ব্বদা তত্তদ্দেহে জাতং জাতং মন্যসে তথা তত্তদ্দেহনাশে মৃতং মন্যসে
পুনঃ পাপপুণ্যয়োস্তত্ফলস্য চ জন্মমরণয়োশ্চানুগামিত্বাৎ তথাপি ত্বং শোচিতুং নার্হসি ॥ ২৬ ॥ কুত ইত্যত আহ জাতস্য হীত্যাদি। হি যস্মাৎ জাতস্যারম্ভককর্ম্মক্ষয়ে মৃত্যুর্ধ্রুবো
নিশ্চিতঃ। মৃতস্য তদ্দেহকৃতেন কর্ম্মণা জন্মাপি ধ্রুবমেব। তস্মাদেবমপরিহার্য্যেঽর্থে জন্মমরণলক্ষণেঽর্থে ত্বং বিদ্বান্‌ শোচিতুং যোগ্যো ন ভবসি ॥ ২৭ ॥

কিঞ্চ দেহাদীনাং স্বভাবং পর্য্যালোচ্য তদুপাধিকে জন্মমরণে শোকো ন কার্য্য ইত্যাহ : অব্যক্তাদীনীত্যাদি । অব্যক্তং প্রধানং প্রকৃতিস্তদেবাদি রূপং পাণ্ডঃ পূর্ব্বরূপং যেষাং : তান্যব্যক্তাদীনি ভূতানি শরীরা
ণি : কারণাত্মনা স্থিতানামেবোৎপত্তেঃ : তথা ব্যক্তং মধ্যং ব্যক্তং মধ্যং জন্মমরণান্তরালে স্থিতি র্যেষাং তানি ব্যক্তমধ্যানি : অব্যক্তে নিধনং বিনাশো লয়ো যেষাং তান্যব্যক্তনিধনানি : স্বকারণে লীনানি : তেষ্বেব
বস্তুতান্যেবং ভূতান্যেব : অত্র তেষু কা পরিদেবনা : কঃ শোকনিমিত্তো বিলাপঃ : প্রতিবুদ্ধস্য স্বপ্নদৃষ্টবস্তুষ্বিব শোকো ন যুজ্যত ইত্যর্থঃ ॥ ২৮ ॥ কুতস্তর্হি বিদ্বাংসোপি শোচন্তি : আত্মাজ্ঞানাদেব
ইত্যাশয়েনাত্মনো দুর্ব্বিজ্ঞেয়তামাহ আশ্চর্য্যবদিত্যাদি : কশ্চিদেনমাত্মানং শাস্ত্রাচার্য্যোপদেশাভ্যাং পশ্যন্নাশ্চর্য্যবৎ পশ্যতি : সর্ব্বগতস্য নিত্যজ্ঞানানন্দস্বভাবস্যাত্মনো লৌকিকত্বাদৈন্দ্রজালিকবদ্ঘটমা

অব্যক্তাদীনি ভূতানি ব্যক্তমধ্যানি ভারত । অব্যক্তনিধনান্যেব তত্র কা পরিদেবনা ॥ ২৮ ॥ আশ্চর্য্যবৎ পশ্যতি কশ্চিদেন

শ্রী ৮ মাশ্চর্য্যবদ্বদতি তথৈব চান্যঃ । আশ্চর্য্যবচ্চৈনমন্যঃ শৃণোতি শ্রুত্বাপ্যেনং বেদ ন চৈব কশ্চিৎ ॥ ২৯ ॥ দেহী নিত্যমবধ্যোয়ং দেহে স

র্ব্বস্য ভারত । তস্মাৎ সর্ব্বাণি ভূতানি ন ত্বং শোচিতুমর্হসি ॥ ৩০ ॥ স্বধর্ম্মমপি

চাবেক্ষ্য ন বিকম্পিতুমর্হসি । ধর্ম্যাদ্ধি যুদ্ধাৎ শ্রেয়োন্যৎ ক্ষত্রিয়স্য ন বিদ্যতে ॥ ৩১ ॥

নং পশ্যন্নিব বিস্ময়েন পশ্যতি : অসম্ভাবনাভিভূতত্বাৎ : তথান্যশ্চাশ্চর্য্যবদেব বদতি : শৃণোতি চান্যঃ : কশ্চিৎ পুনর্বিপরীতভাবনাভিভূতঃ : শ্রুত্বাপি নৈব বেদ চ শব্দাদুক্ত্বাপি দৃষ্ট্বাপি ন সম্যগ্বেদ
ইতি দ্রষ্টব্যং ॥ ২৯ ॥ তদেবমাত্মনো নিত্যত্বং সংক্ষেপেনাদিশন্নশোচ্যত্বমুপসংহরতি দেহীত্যাদি ॥ ৩০ ॥ যচ্চোক্তমর্জ্জুনেন : দৃষ্ট্বেমং স্বজনং কৃষ্ণ যুযুৎসুং সমুপস্থিতং : সীদন্তি মম গাত্রাণি মুখং চ পরিশুষ্যতি : বেপথুশ্চ শরীরে মে রোমহর্ষশ্চ জা
য়তে : ইত্যাদি তৎ পরিহর্তুমাহ স্বধর্ম্মমপীত্যাদি । আত্মনো নাশাভাবাদেব হন্তব্যাংশ্চানেন : বিকম্পিতুং নার্হসি : কিঞ্চ স্বধর্ম্মমপি চাবেক্ষ্য ন বিকম্পিতুমর্হসি : ইতি সম্বন্ধঃ । L
যচ্চোক্তমর্জ্জুনেন : ন চ শ্রেয়োনুপশ্যামি হত্বা স্বজনমাহবে ইতি তত্রাহ । ধর্ম্যাদিতি ধর্ম্মাদনপেতাৎ ন্যায়াদ্ধি যুদ্ধাদন্যৎ ॥ ৩১ ॥

কিঞ্চশ্রেয়সিস্বয়মুপস্থিতে কুতোবিকম্পসীত্যাহ : যদৃচ্ছয়াঅপ্রার্থিতমেবোপপন্নংপ্রাপ্তমীদৃশংযুদ্ধং সুখিনঃ সন্তোলভন্তে : যতোনিরাবরণংস্বর্গদ্বারং : অথবাসুখিনস্তইত্যর্থঃ । এতেনস্বজনংহিকথংহত্বাসুখিন
ঃ তন্নিরস্তংভবতি ॥৩২॥ বিপর্য্যয়েদোষমাহ অথচেদিতি । কিঞ্চঅকীর্ত্তিমিতি : অব্যয়াংশাশ্বতীং সম্ভাবিতস্যবহুমতস্য : অতিরিচ্যতে : অধিকাভবতি ৩৪॥ কিঞ্চভয়াদিত্যাদি ॥ যেষাংত্বং
গুণবত্ত্বেন ত্বংবহুমতোভূত্বায়েন সংগ্রামাত্ত্বাংনিবৃত্তংমন্যন্তে : ততঃপূর্ব্বংবহুমতোভূত্বালাঘবংযাস্যসি ॥ ৩৫ ॥ কিঞ্চঅবাচ্যবাদাংশ্চেত্যাদি : অবাচ্যবাদান্ বচনান

যদৃচ্ছয়াচোপপন্নংস্বর্গদ্বারমপাবৃতং । সুখিনঃক্ষত্রিয়াঃপার্থলভন্তেযুদ্ধমীদৃশং ॥৩২॥ অথচেত্ত্বমিমংধর্ম্ম্যংসংগ্রামংনকরিষ্যসি । ততঃস্বধর্ম্মংকীর্ত্তিঞ্চ
হিত্বাপাপমবাপ্স্যসি ॥ ৩৩ ॥ অকীর্ত্তিঞ্চাপিভূতানিকথয়িষ্যন্তিতে ব্যয়াং । সম্ভাবিতস্যচাকীর্ত্তির্ম্মরণাদতিরিচ্যতে ॥৩৪ ॥ ভয়াদ্রণাদুপ
রতংমংস্যন্তেত্বাংমহারথাঃ । যেষাঞ্চত্বংবহুমতোভূত্বাযাস্যসিলাঘ বং ॥৩৫॥ অবাচ্যবাদাংশ্চবহূন্বদিষ্যন্তিতবাহিতাঃ । নিন্দন্তস্তবসা
মর্থ্যন্ততোদুঃখতরন্নুকিং ॥৩৬॥ হতোবাপ্রাপ্স্যসিস্বর্গংজিত্বাবাভোক্ষ্য সেমহীং । তস্মাদুত্তিষ্ঠকৌন্তেয়যুদ্ধায়কৃতনিশ্চয়ঃ ॥ ৩৭ ॥
সুখদুঃখেসমেকৃত্বালাভালাভৌজয়াজয়ৌ । ত তোযুদ্ধায়যুজ্যস্বনৈবংপাপমবাপ্স্যসি ॥ ৩৮ ॥

হানশব্দান্তবাহিতা বদিষ্যন্তি ॥ ৩৬ ॥ যদুক্তং নচৈতদ্বিদ্ম ইত্যাদি : তত্রাহ : হতোবেতি পক্ষদ্বয়েপিতবলাভএবেত্যর্থঃ ॥৩৭ ॥ যদপ্যুক্তং পাপমেবাশ্রয়েদস্মান্হত্বৈতানাততায়ি
নইতি তত্রাহ : সুখদুঃখেসমেকৃত্বা ইত্যাদি : সুখদুঃখেসমেকৃত্বা : তথাতয়োঃ কারণভূতৌ লাভালাভৌ : তয়োরপিকারণভূতৌ : জয়াজয়ৌ সমৌকৃত্বা : এতেষাংসমত্বকারণংহর্ষবিষাদরা
হিত্যং যুজ্যস্ব সন্নদ্ধোভব : অনেনপ্রকারেণস্বধর্ম্মবুদ্ধ্যা যুধ্যমানঃ পাপং নপ্রাপ্স্যসীত্যর্থঃ ॥ ৩৮ ॥ উপদিষ্টংজ্ঞানযোগমুপসংহরন্ তৎসাধনংকর্ম্মযোগংপ্রস্তৌতি এষাতইত্যাদি ॥

সংখ্যায়তে প্রকাশ্যতে বস্তুতত্ত্বমনয়েতি সংখ্যা সম্যগ্জ্ঞানং তস্মিন্ প্রকাশমানং সাংখ্যং তস্মিন্ করণীয়া বুদ্ধিরেষা তবাভিহিতা এবমভিহিতায়ামপি তব চেদাত্মতত্ত্বমপরোক্ষং ন ভবতি তর্হ্যন্তঃকরণশুদ্ধিদ্বারেণ
আত্মতত্ত্বাপরোক্ষার্থং কর্মযোগে ত্বিমাং বুদ্ধিং শৃণু । যয়া বুদ্ধ্যা যুক্তঃ পরমেশ্বরার্পিতকর্মযোগেন শুদ্ধান্তঃকরণঃ সন্ তৎপ্রসাদলব্ধাপরোক্ষজ্ঞানেন কর্মাত্মকং বন্ধং প্রকর্ষেণ হাস্যসি ত্যক্ষ্যসি ॥৩৯॥
ননু কৃষ্যাদিবৎ কর্মণাং কদাচিদ্বিঘ্নবাহুল্যেন ফলব্যভিচারান্মন্ত্রাদ্যঙ্গবৈগুণ্যেন চ প্রত্যবায়সম্ভবাৎ কুতঃ কর্মযোগেন কর্মবন্ধপ্রহাণং অত আহ নেহেত্যাদি । ইহ নিষ্কামকর্মযোগে অভি-
ক্রমস্য প্রারব্ধস্য নাশো নিষ্ফলত্বং নাস্তি প্রত্যবায়শ্চ ন বিদ্যতে ঈশ্বরোদ্দেশেনৈব বিঘ্ন বৈগুণ্যাদ্যসম্ভবাৎ কিঞ্চাস্য স্বল্পমপি কৃতং উপক্রমমাত্রমপি কৃতং মহতো ভয়াৎ সংসারাৎ ত্রায়-
তে রক্ষতি ন তু কাম্যকর্মবৎ কিঞ্চিদ্বৈগুণ্যাদিনা বৈফল্যমস্যেত্যর্থঃ ॥ ৪০ ॥ কুত ইত্যপেক্ষায়ামুভয়োঃ সকামনিষ্কাময়োর্বৈষম্যমাহ ব্যবসায়াত্মিকেত্যাদি ইহ ঈশ্বরারাধনলক্ষণে
কর্মযোগে ব্যবসায়াত্মিকা পরমেশ্বরভক্ত্যৈব ধ্রুবং তরিষ্যামীতি নিশ্চয়াত্মিকা একৈব একনিষ্ঠৈব বুদ্ধির্ভবতি অব্যবসায়িনাং তু বহির্মুখানাং কামিনাং কামানামানন্ত্যাদনন্তাঃ তত্রাপি চ

এষা তেঽভিহিতা সাংখ্যে বুদ্ধির্যোগে ত্বিমাং শৃণু" । বুদ্ধ্যা যুক্তো যয়া পার্থ কর্মবন্ধং প্রহাস্যসি" ॥৩৯॥ নেহাভিক্রমনাশোঽস্তি প্রত্যবায়ো ন বিদ্যতে"
শ্রী স্বল্পমপ্যস্য ধর্মস্য ত্রায়তে মহতো ভয়াৎ" ॥ ৪০ ॥ ব্যবসায়াত্মিকা বুদ্ধিরেকেহ কুরুনন্দন" । বহুশা-
খা হ্যনন্তাশ্চ বুদ্ধয়োঽব্যবসায়িনাং" ॥ ৪১ ॥ যামিমাং পুষ্পিতাং বাচং প্রবদন্ত্যবিপশ্চিতঃ" । বেদবাদরতাঃ পার্থ নান্যদস্তী-
তীবাদিনঃ" ॥ ৪২ ॥

কর্মফলাদিপ্রকারভেদাদ্বহুশাখা বুদ্ধয়ো ভবন্তি ঈশ্বরারাধনার্থং হি নিত্যনৈমিত্তিকং কর্ম কিঞ্চিদঙ্গবৈগুণ্যেনাপি ন নশ্যতি যথাশক্ত্যা তথা কর্মাদিভিস্তদ্বিধীয়তে ন চ বহুত্বমপি ঈশ্বরোদ্দেশেনৈবৈক্য-
প্রসাদাৎ ন তু তথা কাম্যং কর্ম অনেন মহদ্বৈষম্যমিত্যভিপ্রায়ঃ ॥ ৪১ ॥ ননু কামিনোঽপি কস্মান্ কামান্ বিহায় ব্যবসায়াত্মিকাং বুদ্ধিং কিমিতি নৈব কুর্বন্তি অত আহ যামিমামিত্যাদি পুষ্পিতাং বিষলতাবদাপাতরমণীয়াং
প্রকৃষ্টাং পরমার্থফলপরাং এব বদন্তি যাং স্বর্গাদিফলশ্রুতিং তয়া বাচা অপহৃতচেতসাং ব্যবসায়াত্মিকা বুদ্ধির্ন বিধীয়ত ইতি তৃতীয়েনান্বয়ঃ । কিমিতি তথা বদন্তি যতোঽবিপশ্চিতঃ মূঢাঃ অত এবমাহ বে-
দে যে বাদা অর্থবাদাঃ অক্ষয্যং হ বৈ চাতুর্মাস্যযাজিনঃ সুকৃতং ভবতীতি তথা অপাম সোমমমৃতা অভূমেত্যাদয়স্তেষ্বেব রতাঃ প্রীতাঃ অতএব অতঃ পরং স্বর্গাদ্যৈশ্বর্যং প্রাপ্যং নান্যদস্তীতি বদনশীলাঃ ॥ ৪২ ॥

অতএব কামাত্মানঃ কামাকুলিতচিত্তাঃ : অতঃ স্বর্গ এব পরঃ পুরুষার্থো যেষাং : তে জন্ম চ তত্র কর্ম্মাণি চ তৎফলানি প্রদদাতীতি তথা তাং ভোগৈশ্বর্য্যয়োর্গতিং প্রাপ্তিং প্রতি : সাধনভূতা যে ক্রিয়াবিশেষা
স্তে বহুলা যস্যাং তাং প্রবদন্তীত্যন্বয়ঃ ॥ ৪৩ ॥ ততশ্চ ভোগৈশ্বর্য্যয়োঃ প্রসক্তানামভিনিবিষ্টানাং তয়া পুষ্পিতয়া বাচা : অপহৃতমাকৃষ্টং চেতো যেষাং : তেষাং সমাধিঃ চিত্তৈকাগ্র্যং পরমেশ্বরাভিমুখত্বং :
তস্মিন্ নিশ্চয়াত্মিকা বুদ্ধিন্ন বিধীয়তে : কর্ম্মকর্ত্তরি প্রয়োগঃ : নোৎপদ্যত ইত্যর্থঃ ॥ ৪৪ ॥ ননু যদি স্বর্গাদিকং পরমং ফলং ন ভবতি : তর্হি কিমিতি বেদৈস্তৎসাধনতয়া : কর্ম্মাণি বিধীয়
ন্তে তত্রাহ : ত্রৈগুণ্যবিষয়া ইতি : ত্রিগুণাত্মকাঃ সকামা যে অধিকারিণস্তদ্বিষয়াঃ কর্ম্মফলসম্বন্ধপ্রতিপাদকাঃ সন্তো বেদাঃ : ত্বন্তু নিস্ত্রৈগুণ্যো নিষ্কামো ভব : তত্রোপায়মাহ নির্দ্বন্দ্বঃ
শীতোষ্ণাদিসুখদুঃখযুগলানি দ্বন্দ্বানি তদ্রহিতো ভব : তানি সহস্বেত্যর্থঃ : কথমিত্যত আহ : নিত্যসত্ত্বস্থঃ সন্ ধৈর্য্যমবলম্ব্যেত্যর্থঃ : তথা নির্যোগক্ষেমঃ : অপ্রাপ্তস্বীকারো যোগঃ প্রাপ্তপা

কামাত্মানঃ স্বর্গপরা জন্মকর্ম্মফলপ্রদাং । ক্রিয়াবিশেষবহুলাং ভোগৈশ্বর্য্যগতিং প্রতি ॥ ৪৩ ॥ ভোগৈশ্বর্য্যপ্রসক্তানাং তয়াপহৃতচেতসাং ৮
ব্যবসায়াত্মিকা বুদ্ধিঃ সমাধৌ ন বিধীয়তে ॥ ৪৪ ॥ ত্রৈগুণ্যবিষয়া বেদা নিস্ত্রৈগুণ্যো ভবার্জ্জুন । নির্দ্বন্দ্বো নিত্যসত্ত্বস্থো নির্যোগক্ষেম আত্ম
বান্ ॥ ৪৫ ॥ যাবানর্থ উদপানে সর্ব্বতঃ সংপ্লুতোদকে । তাবান্ সর্ব্বেষু বেদেষু ব্রাহ্মণস্য বিজানতঃ ॥ ৪৬ ॥

লনং ক্ষেমঃ তদ্রহিতঃ আত্মবান্ অপ্রমত্তঃ : নহি দ্বন্দ্বাকুলস্য যোগক্ষেমব্যাপৃতস্য চ প্রমাদিনঃ ত্রৈগুণ্যাতিক্রমঃ সম্ভবতীত্যর্থঃ ॥ ৪৫ ॥ ননু বেদোক্তনানাফলত্যাগেন : নিষ্কামতয়া ঈশ্বরারাধনে ব্যবসায়াত্মিকা
বুদ্ধিঃ কুবুদ্ধিরেবেয়ং ইত্যাশঙ্ক্যাহ : যাবানর্থ ইত্যাদি : উদকং পীয়তে যস্মিন্ তদুদপানং কূপাদি : তস্মিন্ স্বল্পোদকে একত্র কৃৎস্নস্যাসম্ভবাৎ : তত্র তত্র পরিভ্রমণেনৈব বিভাগশঃ : যাবান্ স্না
নপানাদিরর্থঃ প্রয়োজনং ভবতীতি : তাবান্ সর্ব্বোপ্যর্থঃ সর্ব্বতঃ সংপ্লুতোদকে মহাহ্রদে একত্রৈব যথা ভবতি : এবং যাবান্ সর্ব্বেষু বেদেষু তত্তৎকর্ম্মফলরূপোর্থঃ তাবান্ সর্ব্বোপি বিজানতো ব্যবসা
য়াত্মিকাবুদ্ধিযুক্তস্য ব্রাহ্মণস্য ব্রহ্মনিষ্ঠস্য ভবত্যেব : ব্রহ্মানন্দে ক্ষুদ্রানন্দানামন্তর্ভাবাৎ : এতস্যৈবানন্দস্যান্যানি ভূতানি মাত্রামুপজীবন্তীতি শ্রুতেঃ : তস্মাদীয়মেব সুবুদ্ধিরিত্যর্থঃ ॥ ৪৬ ॥

তর্হি সর্ব্বকর্ম্মফলানি : পরমেশ্বরারাধনাদেব ভবিষ্যন্তীতি মত্বা প্রবর্ত্ততেত্যাশঙ্ক্যাহ : কর্ম্মণ্যেবেতি : তবতত্ত্বজ্ঞানার্থিনঃ : কর্ম্মণ্যেবাধিকারস্তৎফলেষু বন্ধহেতুষু অধিকারঃ কামোমা
স্তু । ননু কর্ম্মণি কৃতে তৎফলং স্যাদেব : ভোজনে কৃতে তৃপ্তিবদিত্যাশঙ্ক্যাহ : মা কর্ম্মফলহেতুর্ভূঃ : কর্ম্মফলং প্রবৃত্তিহেতুর্যস্য : তথাভূতো মাভূঃ : কাম্যমানস্যৈব স্বর্গাদেঃ নিয়োজ্যবিশেষণত্বেনফ
লত্বাদকামিতং ফলং ন স্যাদিতি ভাবঃ : অতএব ফলং বন্ধকং ভবতীতি ভিয়াদকর্ম্মণি কর্ম্মাকরণেপি তব সঙ্গো নিষ্ঠা মাস্তু ॥ ৪৭ ॥ কিন্তর্হি যোগস্থ ইত্যাদি যোগঃ পরমেশ্বরৈকপরতা : তত্রস্থিতঃ স
ন্ কর্ম্মাণি কুরু তথা সঙ্গং কর্তৃত্বাভিনিবেশং ত্যক্ত্বা : কেবলমীশ্বরাশ্রয়েণৈব কুরু : তৎফলস্যাপি সিদ্ধ্যসিদ্ধ্যোঃ সমো ভূত্বা : কেবলমীশ্বরার্পণেনৈব কুরু : যত এবম্ভূতং সমত্বমেব যোগ উ
চ্যতে সদ্ভিঃ : চিত্তসমাধানরূপত্বাৎ ॥ ৪৮ ॥ কাম্যন্তু কর্ম্ম : অতিনিকৃষ্টমিত্যাহ : দূরেণাহ্যবরমিত্যাদি : ঈশ্বরারাধনার্থয়া বুদ্ধ্যা কৃতঃ কর্ম্মযোগঃ বুদ্ধিযোগঃ : বুদ্ধিসাধনত্বাদ্বা

কর্ম্মণ্যেবাধিকারস্তে মা ফলেষু কদাচন" ৷ মা কর্ম্মফলহেতুর্ভূর্ম্মা তে সঙ্গোস্ত্বকর্ম্মণি"॥ ৪৭ ॥ যোগস্থঃ কুরু কর্ম্মাণি সঙ্গং ত্যক্ত্বা ধনঞ্জয়" ৷
গী। ১০ সিদ্ধ্যসিদ্ধ্যোঃ সমো ভূত্বা সমত্বং যোগ উচ্যতে"॥ ৪৮ ॥ দূরেণ হ্যবরং কর্ম্ম বুদ্ধিযোগাদ্ধনঞ্জয়" ৷ বুদ্ধৌ শরণমন্বিচ্ছ কৃপণাঃ ফলহেতবঃ"
॥ ৪৯ ॥ বুদ্ধিযুক্তো জহাতীহ উভে সুকৃতদুষ্কৃতে" ৷ তস্মাদ্যোগায় যুজ্যস্ব যোগঃ কর্ম্মসু কৌশলং" ॥ ৫০ ॥

তস্মাৎ সকামাদন্যৎ কাম্যং কর্ম্ম দূরেণাবরমত্যন্তমপকৃষ্টং : হি যস্মাৎ এবং তস্মাদ্বুদ্ধৌ জ্ঞানে : সমাশ্রয়ং কর্ম্মযোগমন্বিচ্ছ : অনুতিষ্ঠ । যদ্বা বুদ্ধৌ শরণং ত্রাতারমীশ্বরমাশ্রয়েত্যর্থঃ : ফলহেতবস্তু : সক
ামনরাঃ কৃপণা দীনাঃ : যো বা এতদক্ষরমবিদিত্বা গার্গ্যস্মাল্লোকাৎ প্রৈতি স কৃপণ ইতি শ্রুতেঃ ॥ ৪৯ ॥ বুদ্ধিযোগযুক্তঃ শ্রেষ্ঠ ইত্যাহ : বুদ্ধিযুক্ত ইত্যাদি : সুকৃতং স্বর্গাদিপ্র
াপকং : দুষ্কৃতং নিরয়প্রাপকং : উভে অপীহৈব জন্মনি : পরমেশ্বর প্রসাদেন জহাতি : তস্মাত্তদর্থায় কর্ম্মযোগায় যুজ্যস্ব ঘটস্ব : যতঃ কর্ম্মসু কৌ
শলং : বন্ধকানামপি তেষামীশ্বরারাধনেন মোক্ষপরত্বসম্পাদনচাতুর্য্যং সমত্বযোগঃ ॥ ৫০ ॥ ওঁ নমঃ শিবায় ॥ ৫০ ॥

কর্ম্মণাং মোক্ষসাধনত্বপ্রকারমাহ কর্ম্মজমিত্যাদি । কর্ম্মজং ফলং ত্যক্ত্বা কেবলমীশ্বরারাধনার্থং কর্ম্ম কুর্ব্বাণা মনীষিণো জ্ঞানিনো ভূত্বা । জন্মরূপেণ বন্ধেন বিনির্ম্মুক্তাঃ সন্তোঽ
নাময়ং সর্ব্বোপদ্রবরহিতং বিষ্ণোঃ পদং মোক্ষাখ্যং গচ্ছন্তি ॥৫১॥ কদা তৎপদং প্রাপ্স্যামীত্যপেক্ষায়ামাহ যদেতি দ্বাভ্যাং । মোহো দেহাদিষ্বাত্মবুদ্ধিঃ তদেব কলিলং গহনং বি
ষিতি অভিধানকোষস্মৃতেঃ । তস্যায়মর্থঃ এবং পরমেশ্বরারাধনে ক্রিয়মানে যদা তৎপ্রসাদেন তব বুদ্ধির্দেহাভিমানলক্ষণং মোহময়ং গহনং দুর্গং বিশেষেণাতিতরিষ্যতি । ত
দা শ্রোতব্যস্য শ্রুতস্য চার্থস্য নির্ব্বেদং বৈরাগ্যং গন্তাসি প্রাপ্স্যসি । তয়োরনুপাদেয়ত্বেন জিজ্ঞাসাং ন করিষ্যসীত্যর্থঃ ॥৫২॥ তথা শ্রুতিবিপ্রতিপন্নেত্যাদি শ্রুতিভির্নানালৌকিকবৈ

কর্ম্মজং বুদ্ধিযুক্তা হি ফলং ত্যক্ত্বা মনীষিণঃ । জন্মবন্ধবিনির্ম্মুক্তাঃ প দং গচ্ছন্ত্যনাময়ং ॥৫১॥ যদা তে মোহকলিলং বুদ্ধির্ব্যতিতরিষ্যতি । তদা গ
ন্তাসি নির্ব্বেদং শ্রোতব্যস্য শ্রুতস্য চ ॥৫২॥ শ্রুতিবিপ্রতিপন্না তে যদা স্থাস্যতি নিশ্চলা । সমাধাবচলা বুদ্ধিস্তদা যোগমবাপ্স্যসি ॥৫৩॥ অর্জ্জুন উ
বাচ ॥ স্থিতপ্রজ্ঞস্য কা ভাষা সমাধিস্থস্য কেশব । স্থিতধীঃ কিং প্রভাষেত কি মাসীত ব্রজেত কিং ॥৫৪॥ শ্রীভগবানুবাচ ॥ প্রজহাতি যদা কামান্ সর্ব্বান্ পার্থ মনো
গতান্ । আত্মন্যেবাত্মনা তুষ্টঃ স্থিতপ্রজ্ঞস্তদোচ্যতে ॥ ৫৫ ॥

দিকার্থশ্রবণৈর্বিপ্রতিপন্না ইতস্ততো বিক্ষিপ্তা সতী তব বুদ্ধির্যদা সমাধৌ স্থাস্যতি । সমাধীয়তে চিত্তমস্মিন্নিতি সমাধিঃ পরমেশ্বরঃ তস্মিন্নিশ্চলা বিষয়ান্তরৈরাকৃষ্টা । অতএবাচলা । অভ্যাসপাটবেন তত্রৈব স্থিরা সতী ত
দা যোগফলং তত্ত্বজ্ঞানমবাপ্স্যসি ॥৫৩॥ পূর্ব্বশ্লোকোক্তস্যাপ্ততত্ত্বজ্ঞস্য লক্ষণং জিজ্ঞাসুরর্জ্জুন উবাচ । স্থিতপ্রজ্ঞস্যেত্যাদি । স্বাভাবিকে সমাধৌ স্থিতস্য অতএব স্থিরা নিশ্চলা প্রজ্ঞা বুদ্ধির্যস্য তস্য কা ভাষা । ভাষ্যতেঽনয়ে
তি ভাষা লক্ষণমিতি যাবৎ । কেন লক্ষণেন স্থিতপ্রজ্ঞো ব্যুচ্যত ইত্যর্থঃ । তথা স্থিতধীঃ কথং ভাষণমাসনং ব্রজনঞ্চ কুর্য্যাদিত্যর্থঃ ॥৫৪॥ অত্র যানি সাধকস্য জ্ঞানসাধনানি তান্যেব স্বাভাবিকানি সিদ্ধ
স্য লক্ষণানি কথয়ন্নুত্তরং ধ্যানিষ্ঠানসাধনান্যাহ যাবদধ্যায়সমাপ্তি । অত্র প্রথমপ্রশ্নস্যোত্তরমাহ প্রজহাতীত্যাদি দ্বাভ্যাং । মনসি স্থিতান্ যদা প্রকর্ষেণ জহাতি । ত্যাগে হেতুমাহ । আত্মন্যেব স্বস্মিন্নেব পরমা
নন্দরূপে আত্মনা স্বয়মেব তুষ্টো ভবতি । আত্মারামঃ সন্ যদা ক্ষুদ্রবিষয়াভিলাষং ত্যজতি । তদা তেন লক্ষণেন মুনিঃ স্থিতপ্রজ্ঞ উচ্যত ইত্যর্থঃ ॥ ৫৫ ॥ ওঁ নমঃ শিবায় ॥ ৫৫ ॥

কিঞ্চ দুঃখেষ্বিত্যাদি। দুঃখেষু প্রাপ্তেষ্বপি অনুদ্বিগ্নমক্ষুভিতং মনো যস্য সঃ। সুখেষু বিগতা স্পৃহা যস্য সঃ। তত্র হেতুঃ। বীতা অপগতা রাগভয়ক্রোধা যস্মাৎ। রাগঃ প্রীতিঃ। স মুনিঃ স্থিতধীরিত্যুচ্যতে ॥
৫৬ ॥ কথং ভাষেতেতি যস্যোত্তরমাহ। য ইত্যাদি। যঃ সর্ব্বত্র পুত্রমিত্রাদিষ্বপি অনভিস্নেহঃ স্নেহরহিতঃ। অতএব আগন্তুকং তত্তৎ শুভমশুভং চ প্রাপ্য নাভিনন্দতি ন প্রশংসতি। অশুভং প্রাপ্য
ন দ্বেষ্টি ন নিন্দতি। কিন্তু কেবলমুদাসীন এব ভাষতে তস্য প্রজ্ঞা প্রতিষ্ঠিতেত্যর্থঃ ॥৫৭॥ কিঞ্চ যদেত্যাদি। যদা চায়ং যোগী ইন্দ্রিয়ার্থেভ্যঃ শব্দাদিভ্যঃ সকাশাদিন্দ্রিয়াণি সংহরতে
প্রত্যাহরতে। অনায়াসেন সংহারে দৃষ্টান্তঃ। অঙ্গানি করচরণাদীনি কূর্ম্মো যথা স্বভাবেনৈবাকর্ষতি তদ্বৎ ॥৫৮॥ ননু ইন্দ্রিয়াণাং বিষয়েষু প্রবৃত্তিঃ স্থিতপ্রজ্ঞস্য নন্বাংশবিরতিসহিত জড়ানাং

দুঃখেষ্বনুদ্বিগ্নমনাঃ সুখেষু বিগতস্পৃহঃ। বীতরাগভয়ক্রোধঃ স্থিতধীর্মুনিরুচ্যতে ॥৫৬॥ যঃ সর্ব্বত্রানভিস্নেহস্তত্তৎপ্রাপ্য শুভাশুভং। নাভিনন্দ
গী ॥ তি ন দ্বেষ্টি তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥৫৭॥ যদা সংহরতে চায়ং কূর্ম্মোঽঙ্গানীব সর্ব্বশঃ। ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যস্তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥৫৮॥ বিষয়া বিনিবর্ত্ত
ন্তে নিরাহারস্য দেহিনঃ। রসবর্জ্জং রসোঽপ্যস্য পরং দৃষ্ট্বা নিবর্ত্ততে ॥৫৯॥ যততো হ্যপি কৌন্তেয় পুরুষস্য বিপশ্চিতঃ। ইন্দ্রিয়াণি প্রমাথীনি হরন্তি প্রসভং মনঃ ॥৬০॥

রুগ্নানাং উপবাসপরাণাং অপি দৃশ্যতে তৎ কথমেতৎ বিশেষমাত্রাহ। বিষয়া ইত্যাদি। ইন্দ্রিয়ৈর্বিষয়াণামাহরণং গ্রহণমাহারঃ। নিরাহারস্য ইন্দ্রিয়ৈর্বিষয়গ্রহণমকুর্ব্বতো দেহিনো দেহাভিমানিনো জন্তোঃ বিষয়া বিনিবর্ত্তন্তে। তদনুভবা
নিবর্ত্তন্ত ইত্যর্থঃ। কিন্তু রসো রাগোঽভিলাষস্তদ্বর্জ্জং। অভিলাষস্তু ন নিবর্ত্তত ইত্যর্থঃ। রসো রাগোঽপি পরং পরমাত্মানং দৃষ্ট্বা অস্য স্থিতপ্রজ্ঞস্য নিবর্ত্ততে নশ্যতীত্যর্থঃ। যদ্বা নিরাহারস্য উপবাসপরস্য বিষয়াঃ প্রায়শো
নিবর্ত্তন্তে। ক্ষুধাসন্তপ্তস্য শব্দস্পর্শাদ্যপেক্ষাভাবাৎ। পরন্তু রসবর্জ্জং রসাপেক্ষা তু ন নিবর্ত্তত ইত্যর্থঃ। শেষং সমানং ॥৫৯॥ ইন্দ্রিয়সংযমনং বিনা স্থিতপ্রজ্ঞতা ন ভবতি। অতঃ সাধকাবস্থায়াং তত্র মহান্ প্রযত্নঃ কর্ত্তব্য ইত্যাহ
যততো হ্যপীতি দ্বাভ্যাং। যততঃ মোক্ষে প্রযতমানস্যাপি বিবেকিনো বিপশ্চিতোঽপি মন ইন্দ্রিয়াণি প্রসভং বলাদ্ধরন্তি যতঃ প্রমাথীনি প্রমথনশীলানি ক্ষোভকানি ॥ ৬০ ॥

যস্মাদেবং তস্মাত্তানি সর্ব্বাণি সংযম্য যুক্ত আসীতেত্যাদি যুক্তো যোগী তানীন্দ্রিয়াণি সংযম্য মৎপরঃ সন্নাসীত যস্য বশে বর্ত্তীনি এতেনচ কথমাসীতেতি প্রশ্নস্য বশীকৃতেন্দ্রিয়ঃ সন্নাসীতেত্যুত্তরমুক্তং
ভবতি ॥৬১॥ বাহ্যেন্দ্রিয়সংযমাভাবে দোষমুক্ত্বা মনঃসংযমাভাবে দোষমাহ ধ্যায়ত ইতি দ্বাভ্যাং গুণবুদ্ধ্যা বিষয়ান্ ধ্যায়তঃ পুংসস্তেষু সঙ্গ আসক্তির্ভবতি আসক্ত্যা চ তেষু অধিকঃ কামো ভবতি কামাচ্চ কেনচিৎ
প্রতিহতাৎ ক্রোধো ভবতি ॥৬২॥ কিঞ্চ ক্রোধাদিত্যাদি ক্রোধাৎ সম্মোহঃ কার্য্যাকার্য্যবিবেকাভাবঃ ততঃ শাস্ত্রাচার্য্যোপদিষ্টার্থস্মৃতের্বিভ্রমঃ বিচলনং ভ্রংশো নাশঃ ততশ্চ
চেতনায়া নাশঃ [illegible] ততঃ প্রণশ্যতি মৃততুল্যো ভবতি ॥৬৩॥ নন্বিন্দ্রিয়াণাং বিষয়প্রবণস্বভাবানাং নিরোদ্ধুমশক্যত্বাদয়ং দোষো দুষ্পরিহার ইতি স্থিতপ্রজ্ঞ...

তানি সর্ব্বাণি সংযম্য যুক্ত আসীত মৎপরঃ। বশে হি যস্যেন্দ্রিয়াণি তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥৬১॥ ধ্যায়তো বিষয়ান্ পুংসঃ সঙ্গস্তেষূপজায়তে।
সঙ্গাৎ সঞ্জায়তে কামঃ কামাৎ ক্রোধোঽভিজায়তে ॥৬২॥ ক্রোধাদ্ভবতি সম্মোহঃ সম্মোহাৎ স্মৃতিবিভ্রমঃ। স্মৃতিভ্রংশাদ্ বুদ্ধি-
নাশো বুদ্ধিনাশাৎ প্রণশ্যতি ॥৬৩॥ রাগদ্বেষবিযুক্তৈস্তু বিষয়ানিন্দ্রিয়ৈশ্চরন্। আত্মবশ্যৈর্বিধে-
য়াত্মা প্রসাদমধিগচ্ছতি ॥৬৪॥ প্রসাদে সর্ব্বদুঃখানাং হানিরস্যোপজায়তে। প্রসন্নচেতসো হ্যাশু বুদ্ধিঃ পর্য্যবতিষ্ঠতে ॥৬৫॥

কথং স্যাদিত্যাশঙ্ক্যাহ রাগদ্বেষবিযুক্তৈরিত্যাদি দ্বাভ্যাং রাগদ্বেষরহিতৈর্বিগতদর্পৈরিন্দ্রিয়ৈর্বিষয়ানাচরন্ অশ্নুবানোঽপি প্রসাদং শান্তিমাপ্নোতি রাগদ্বেষরাহিত্যমাহ
আত্মনো মনসো বশ্যৈর্বিধেয়ো বশবর্ত্তী আত্মা মনো যস্য অনেনেদমুক্তং ভবতি যস্য চেত্তর্যপ্রশ্নস্য স্বাধীনৈরিন্দ্রিয়ৈর্বিষয়ান্ গচ্ছতীত্যুত্তরমুক্তং ভবতি ॥৬৪॥ প্রসাদে সতি কিং স্যাদিত্যত্রাহ
প্রসাদ ইতি প্রসাদে সতি দুঃখনাশঃ স্যাৎ ততঃ প্রসন্নচেতসো বুদ্ধিঃ প্রতিষ্ঠিতা ভবতীত্যর্থঃ ॥৬৫॥ ইন্দ্রিয়নিগ্রহস্য স্থিতপ্রজ্ঞতাসাধনত্বমিতিরেকমুখেনোপপাদয়তি নাস্তীত্যাদি ॥

অযুক্তস্যাবশীকৃতেন্দ্রিয়স্য নাস্তি বুদ্ধিঃ শাস্ত্রাচার্য্যোপদেশাভ্যাং আত্মবিষয়া বুদ্ধিঃ প্রজ্ঞা নোৎপদ্যতে ঃ কুতস্তস্যাঃ প্রতিষ্ঠাবার্ত্তা ঃ কুতো যতস্তথাহ ঃ নচাযুক্তস্য ভাবনা ধ্যানং ঃ ভাবনয়া হি বুদ্ধিরাত্মনি প্রতিষ্ঠিতা ভব
তি ঃ সা চাযুক্তস্য যতো নাস্তি ঃ নচাভাবয়তঃ আত্মধ্যানমকুর্ব্বতঃ শান্তিরাত্মনি চিত্তোপশমঃ অশান্তস্য কুতঃ সুখং মোক্ষানন্দ ইত্যর্থঃ ॥ ৬৬ ॥ নাস্তি বুদ্ধিরযুক্তস্যেত্যত্র হেতুমাহ ঃ ইন্দ্রিয়াণামিত্যাদি
ইন্দ্রিয়াণামবশীকৃতানাং ঃ স্বৈরং বিষয়েষু চরতাং মধ্যে ঃ যদেবৈকং মনঃ অনুবিধীয়তে ঃ অবশীকৃতং যদিন্দ্রিয়েণ সহ গচ্ছতি ঃ তদেবৈকমিন্দ্রিয়মস্য মনসঃ পুরুষস্য বা প্রজ্ঞাং হরতি ঃ বিষয়বিক্ষিপ্তাং করো
তি ঃ কিং পুনর্বহূনি প্রজ্ঞাং হরন্তীতি ঃ যথা প্রমত্তস্য কর্ণধারস্য নাবং ঃ সমুদ্রে বায়ুঃ সর্ব্বতঃ পরিভ্রময়তি তদ্বৎ ॥ ৬৭ ॥ ইন্দ্রিয়সংযমস্য স্থিতপ্রজ্ঞস্য সাধনত্বং লক্ষণত্বঞ্চোক্তমুপসংহরতি তস্মাদিত্যাদি প্র

নাস্তি বুদ্ধিরযুক্তস্য নচাযুক্তস্য ভাবনা । নচাভাবয়তঃ শান্তিরশান্তস্য কুতঃ সুখং ॥ ৬৬ ॥ ইন্দ্রিয়াণাং হি চরতাং যন্মনোঽনুবিধীয়তে । তদস্য হরতি প্রজ্ঞাং
শ্রী ১২ বায়ুর্নাবমিবাম্ভসি ॥ ৬৭ ॥ তস্মাদ্যস্য মহাবাহো নিগৃহীতানি সর্ব্বশঃ । ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যস্তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ৬৮ ॥
যা নিশা সর্ব্বভূতানাং তস্যাং জাগর্ত্তি সংযমী । যস্যাং জাগ্রতি ভূতানি সা নিশা পশ্যতো মুনেঃ ॥ ৬৯ ॥

তিষ্ঠিতা ভবতীত্যর্থঃ ঃ নচ শাস্ত্রাপসংহারশ্চ তস্য প্রজ্ঞা প্রতিষ্ঠিতা তথেত্যর্থঃ ঃ মহাবাহো ইতি সম্বোধয়ন্ ঃ বৈরিনিগ্রহে সমর্থস্য তবাত্রাপি সামর্থ্যং ভবেদিতি সূচয়তি ॥ ৬৮ ॥ নন্বেবং ন কশ্চিদপি প্রসুপ্তবদ্দর্শনাদি
ব্যাপারশূন্যঃ ঃ সর্ব্বথা মনানিগৃহীতেন্দ্রিয়ো লোকে দৃশ্যতে ঃ অতো হসম্ভাবিতমিদং লক্ষণমিত্যাহ যা নিশেত্যাদি ঃ সর্ব্বেষাং ভূতানাং যা নিশা ঃ নিশেব নিশা ঃ আত্মনিষ্ঠা ঃ অজ্ঞানবুদ্ধিরপ্রকাশাত্মকত্বাৎ তস্যাম্দর্শনাদিব্যবহারাভাবাৎ
তস্যামাত্মনিষ্ঠায়াং সংযমী নিগৃহীতেন্দ্রিয়ো জাগর্ত্তি প্রবুধ্যতে ঃ যস্যান্তু বিষয়নিষ্ঠায়াং ভূতানি জাগ্রতি প্রবুধ্যন্তে ঃ সা আত্মতত্ত্বং পশ্যতো মুনের্নিশা তস্যাং দর্শনাদিব্যাপারস্তস্য নাস্তীত্যর্থঃ ঃ এতদুক্তং ভবতি ঃ যথা দি
বান্ধানামুলূকাদীনাং রাত্রাবেব দর্শনং ন তু দিবসে ঃ এবং ব্রহ্মজ্ঞস্য যোগিনো নিতান্তস্যাপি প্রসুপ্তবদ্বস্তুবিষয়েষু ঃ অতো নাসম্ভাবিতমিদং লক্ষণমিতি ॥ ৬৯ ॥ শ্রীকৃষ্ণায় নমঃ ॥ ০ ॥

নন্বিষয়েষু ভোগেঽপ্যাবেশাভাবে কথং ... ইত্যপেক্ষায়ামাহ । আপূর্য্যমাণমিত্যাদি । নানানদীভিরাপূর্য্যমাণমপি । অচলপ্রতিষ্ঠমনতিক্রান্তমর্য্যাদমেব সমুদ্রং পুনরন্যা অপ্যাপো যথা প্রবিশন্তি তথা কামা বিষয়া যং মুনিমন্তর্দৃষ্টিং বো
ধয়ন্তো বিক্রিয়মানমেব প্রারব্ধকর্ম্মভিরাক্ষিপ্তাঃ সন্তঃ প্রবিশন্তি । স শান্তিং কৈবল্যং প্রাপ্নোতি । ন তু কামকামী ভোগকামনাশীলঃ ॥ ৭০ ॥ যস্মাদেবং তস্মাদ্বিহায়েত্যাদি প্রাপ্তান্ কামান্ বিহায় ত্যক্ত্বোপেক্ষ্য অপ্রাপ্তেষু চ নিস্পৃ
হঃ যতো নিরহঙ্কারঃ অতএব ভোগসাধনেষু নির্ম্মমঃ সন্ দেহজীবনমাত্রার্থং প্রারব্ধবশেন ভোগান্ ভুঙ্ক্তে । যত্র কাপি গচ্ছতি তিষ্ঠতি বা স শান্তিং প্রাপ্নোতি ॥ ৭১ ॥ উক্তাং জ্ঞাননিষ্ঠাং স্তুবন্নুপসংহরতি । এষেত্যাদি
ব্রাহ্মী স্থিতির্ব্রহ্মজ্ঞাননিষ্ঠা এষা এবম্ভূতা । এনাং পরমেশ্বরারাধনেন বিশুদ্ধান্তঃকরণঃ প্রাপ্য ন বিমুহ্যতি পুনঃ সংসারমোহং ন প্রাপ্নোতি । যতো অন্তকালে মৃত্যুসময়েঽপ্যস্যাং ক্ষণমাত্রং স্থিত্বা ব্রহ্ম
নির্ব্বাণং ব্রহ্মণি লয়মৃচ্ছতি । কিম্পুনর্ব্বক্তব্যং বাল্যমারভ্য স্থিত্বা প্রাপ্নোতি ॥ ৭২ ॥ * ॥ ইতি শ্রীধরবোধন্যাং দ্বিতীয়োঽধ্যায়ঃ ॥ * ॥ শোকপঙ্কনিমগ্নং যঃ সাংখ্যযোগোপদেশতঃ । উজ্জহারার্জ্জুনং ভক্তং স কৃষ্ণঃ

আপূর্য্যমাণমচলপ্রতিষ্ঠং সমুদ্রমাপঃ প্রবিশন্তি যদ্বৎ । তদ্বৎ কামা যং প্রবিশন্তি সর্ব্বে স শান্তিমাপ্নোতি ন কামকামী ॥ ৭০ ॥ বিহায় কামান্ যঃ সর্ব্বান্ পুমাংশ্চর
তি নিস্পৃহঃ । নির্ম্মমো নিরহঙ্কারঃ স শান্তিমধিগচ্ছতি ॥ ৭১ ॥ এষা ব্রাহ্মী স্থিতিঃ পার্থ নৈনাং প্রাপ্য বিমুহ্যতি । স্থিত্বাস্যামন্তকালেঽপি ব্রহ্মনির্ব্বাণ
মৃচ্ছতি ॥ ৭২ ॥ * ॥ ইতি শ্রীভগবদ্গীতাসূপনিষৎসু সাংখ্যযোগো নাম দ্বিতীয়োঽধ্যায়ঃ ॥ * ॥ অর্জ্জুন উবাচ ॥ জ্যায়
সী চেৎ কর্ম্মণস্তে মতা বুদ্ধির্জ্জনার্দ্দন । তৎ কিং কর্ম্মণি ঘোরে মাং নিয়োজয়সি কেশব ॥ ১ ॥

শরণং মম ॥ তৃতীয়ে কর্ম্মণা শুদ্ধঃ শ্রেষ্ঠঃ কঃ সাংখ্যযোগয়োঃ । ইত্যা [illegible] ইত্যাভেদেন বিচ্ছিনা ॥ পূর্ব্বাধ্যায়ে অশোচ্যানন্বশোচস্ত্বমিত্যাদিনা মোক্ষসাধনত্বেন দেহাত্মবিবেকবুদ্ধিরুক্তা । তদনন্তরং
এষা তেঽভিহিতা সাংখ্যে ইত্যাদিনা কর্ম্ম চোক্তং । ন চ তয়োর্গুণপ্রধানভাবঃ স্পষ্টং দর্শিতঃ । তত্র বুদ্ধিযুক্তস্য স্থিতপ্রজ্ঞস্য নিষ্কামস্য নিয়তেন্দ্রিয়স্য নিরহঙ্কারস্য মোক্ষাভিধানাদেষা ব্রাহ্মী স্থিতিঃ পার্থেতি সপ্রশংসমু
পসংহারাচ্চ বুদ্ধিকর্ম্মণোর্মধ্যে বুদ্ধেঃ শ্রেষ্ঠত্বমিতি মন্বানো অর্জ্জুন উবাচ । জ্যায়সী চেদিতি । কর্ম্মণঃ সকাশান্মোক্ষাঙ্গত্বেন বুদ্ধির্জ্যায়সী অধিকতরা শ্রেষ্ঠা চেত্তব সম্মতা তর্হি কিমর্থং তস্মাদ্বুদ্ধ্যা
যুক্তস্তিষ্ঠেতি বারম্বারং বদন্ ঘোরে হিংসাত্মকে কর্ম্মণি মাং প্রবর্ত্তয়সি ॥ ১ ॥

নন্বধর্ম্যাদ্ধিযুদ্ধাৎ শ্রেয়োন্যৎক্ষত্রিয়স্যনবিদ্যতইত্যাদিনাকর্ম্মণোপিশ্রেয়স্ত্বমুক্তমেবেত্যাশঙ্ক্যাহ : ব্যামিশ্রেণেবেত্যাদি । ক্বচিৎকর্ম্মপ্রশংসা : ক্বচিজ্জ্ঞানপ্রশংসাইত্যেবংব্যামিশ্রং : সন্দেহোৎপাদকমিব : যদ্বা
ক্যং : তেনমেমতিমুভয়প্রদানাকিতাঁকুর্ব্বন্‌মোহয়সীব : পক্ষপাতহীনস্যতবমোহকত্বংনাস্ত্যেব তথাপিভ্রান্ত্যামমৈবংপ্রতীতিজায়তইতিভাবঃ ইবশব্দেনোক্তং । অতস্তয়োর্ম্মধ্যেযচ্ছ্রেয়স্তদেকংনিশ্চিত্যবদেতি । যদ্বাস্বহমি
দ্ধমেবশ্রেয়ঃসাধনমিতি : নিশ্চিত্যযেনানুষ্ঠিতেন শ্রেয়োমোক্ষমাপ্নুয়াং প্রাপ্স্যামি : তদেকংবদেত্যর্থঃ ॥ ২ ॥ অত্রোত্তরংশ্রীভগবানুবাচ ॥ লোকেস্মিন্নিত্যাদি : অয়মর্থঃ : যদিময়াপৃথক্‌স্বতন্ত্র
নিরপেক্ষংমোক্ষসাধনত্বেন কর্ম্মজ্ঞানযোগরূপংনিষ্ঠাদ্বয়মুক্তংস্যাৎ : তর্হিদ্বয়োর্ম্মধ্যেযদ্ভদ্রংতদেকংবদেতি : ত্বদীয়ঃপ্রশ্নঃ সংগচ্ছতে । নতুময়াতথোক্তং : কিন্তুদ্বাভ্যামেকৈবব্রহ্মনিষ্ঠোক্তা : গুণপ্রধান

শ্রী॥৩ ব্যামিশ্রেণেবাক্যেনবুদ্ধিং মোহয়সীবমে ॥ তদেকংবদনিশ্চিত্যযেনশ্রেয়োহমাপ্নুয়াং ॥ ২ ॥ শ্রীভগবানুবাচ ॥
লোকেস্মিন্দ্বিবিধানিষ্ঠা পুরাপ্রোক্তাময়ানঘ ॥ জ্ঞানযোগেনসাংখ্যানাংকর্ম্মযোগেনযোগিনাং ॥ ৩ ॥

ত্বয়োস্তয়োস্বাতন্ত্র্যেণপাতঃ : একস্যাএবতুপ্রকারভেদমাত্রমধিকারিভেদেনোক্তমিতি : অস্মিন্‌শুদ্ধান্তঃকরণতয়া দ্বিবিধেলোকেত্বধিকারিজনে : দ্বৌবিধৌপ্রকারৌযস্যাঃ সাদ্বিবিধানিষ্ঠামোক্ষ
পরতাপুরাপূর্ব্বাধ্যায়ে : ময়াসর্ব্বজ্ঞেনপ্রোক্তা : স্পষ্টমেবোক্তা : প্রকারদ্বয়মেবনির্দ্দিশতি : সাংখ্যানাংশুদ্ধান্তঃকরণানাং : জ্ঞানভূমিমারূঢ়ানাং । জ্ঞানপরিপাকার্থং : জ্ঞানযোগেনধ্যানাদিনানিষ্ঠাব্রহ্ম
পরতোক্তা : তানিসর্ব্বাণিসংযম্যযুক্তআসীতমৎপরইত্যাদিনা । সাংখ্যভূমিকামারুরুক্ষূনাং : অশুদ্ধান্তঃকরণানাং তদারোহার্থং : তদুপায়ভূতকর্ম্মযোগাধিকারিকাণিনাং যোগিনাং কর্ম্মযোগেননিষ্ঠোক্তা
ধর্ম্যাদ্ধিযুদ্ধাৎশ্রেয়োন্যদিত্যাদিনা : অতএব তত্রচিত্তশুদ্ধ্যশুদ্ধিরূপাবস্থাভেদেন দ্বিবিধাপি নিষ্ঠোক্তা । এষাতেভিহিতা সাংখ্যেবুদ্ধির্যোগেত্বিমাংশৃণ্বিত্যাদিনা ॥ ৩ ॥

অতশ্চিত্তশুদ্ধ্যা সম্যক্‌জ্ঞানোৎপত্তিপর্যন্তং বর্ণাশ্রমোচিতানি কর্মাণি কর্তব্যানি। অন্যথা চিত্তশুদ্ধ্যভাবেন জ্ঞানানুৎপত্তেরিত্যাহ নকর্মণামিতি কর্মণামনারম্ভাদননুষ্ঠানান্নৈষ্কর্ম্যং জ্ঞানং নাশ্নুতে ন প্রাপ্নোতি। ননু চ এতমেব প্রব্রাজিনো লোকমিচ্ছন্তঃ প্রব্রজন্তীতি সংন্যাসস্য মোক্ষাঙ্গত্বশ্রুতেঃ সংন্যাসাদেব মোক্ষো ভবিষ্যতি কিং কর্মভিরিত্যাশঙ্ক্যাহ নচেতি। ন চ চিত্তশুদ্ধিং বিনা কৃতসংন্যাসাদেব জ্ঞানশূন্যাৎ সিদ্ধিং মোক্ষং সমধিগচ্ছতি প্রাপ্নোতি॥৪॥ কর্মণাং সংন্যাসস্তেষ্বনাসক্তিমাত্রং ন তু স্বরূপেণ অশক্যত্বাদিত্যাহ নহি কশ্চিৎ ক্ষণমপীত্যাদি। যাতু কস্যাঞ্চিদপ্যবস্থায়াং ক্ষণমাত্রমপি জ্ঞানী বা অজ্ঞানী বা অকর্মকৃৎ কর্মাণ্যকুর্বাণো ন তিষ্ঠতি। অত্র হেতুমাহ প্রকৃতিজৈঃ স্বভাবপ্রভবৈ রাগদ্বেষাদিভির্গুণৈঃ সর্বোঽপি জনঃ কর্ম কার্যতে কর্মণি প্রবর্ত্যতে।

ন কর্মণামনারম্ভান্নৈষ্কর্ম্যং পুরুষোঽশ্নুতে। ন চ সংন্যসনাদেব সিদ্ধিং সমধিগচ্ছতি॥৪॥ নহি কশ্চিৎ ক্ষণমপি জাতু তিষ্ঠত্যকর্মকৃৎ। কার্যতে হ্যবশঃ কর্ম সর্বঃ প্রকৃতিজৈর্গুণৈঃ॥৫॥ কর্মেন্দ্রিয়াণি সংযম্য য আস্তে মনসা স্মরন্। ইন্দ্রিয়ার্থান্বিমূঢাত্মা মিথ্যাচারঃ স উচ্যতে॥৬॥ যস্ত্বিন্দ্রিয়াণি মনসা নিয়ম্যারভতেঽর্জুন। কর্মেন্দ্রিয়ৈঃ কর্মযোগমসক্তঃ স বিশিষ্যতে॥৭॥ নিয়তং কুরু কর্ম ত্বং কর্ম জ্যায়ো হ্যকর্মণঃ। শরীরযাত্রাপি চ তে ন প্রসিদ্ধ্যেদকর্মণঃ॥৮॥

অবশঃ অস্বতন্ত্রঃ সন্॥৫॥ অতোঽজ্ঞং কর্মত্যাগিনং নিন্দতি কর্মেন্দ্রিয়াণীত্যাদি। বাক্‌পাণ্যাদীনি কর্মেন্দ্রিয়াণি সংযম্য নিগৃহ্য য আস্তে ভগবদ্ধ্যানচ্ছলেন ইন্দ্রিয়ার্থান্বিষয়ান্ স্মরন্নাস্তে। অবিশুদ্ধতয়া মনসঃ আত্মনি স্থৈর্যাভাবাৎ। স মিথ্যাচারঃ কপটাচারঃ দাম্ভিক উচ্যতে॥৬॥ এতদ্বিপরীতঃ কর্মকর্তা তু শ্রেষ্ঠ ইত্যাহ যস্ত্বিতি। যস্তু জ্ঞানেন্দ্রিয়াণি মনসা নিয়ম্য ঈশ্বরপ্রবণানি কৃত্বা কর্মেন্দ্রিয়ৈঃ কর্মরূপং যোগমারভতে অনুতিষ্ঠতি অসক্তঃ ফলাভিসন্ধিরহিতঃ স বিশিষ্যতে বিশিষ্টো ভবতি চিত্তশুদ্ধ্যা জ্ঞানবান্ ভবতীত্যর্থঃ॥৭॥ যস্মাদেবং তস্মান্নিয়তমিত্যাদি। নিয়তং নিত্যং সন্ধ্যোপাসনাদিকং কুরু। হি যস্মাৎ অকর্মণঃ কর্মাকরণাৎ সকাশাৎ কর্ম জ্যায়ঃ অধিকতরং। অন্যথা অকর্মণঃ কর্মশূন্যস্য তব শরীরনির্বাহোঽপি ন ভবেৎ॥ ৮ ॥